एक समय यथार्थ ज्ञानके उदय होनेसे राजा वज्रनाभिने देवताओं द्वारा अभिलषणीय उस पुष्कलावती देशको कुम्हलाई मालाके समान छोड़ दिया ॥७३॥ वज्रदन्त नामके पुत्रको राज्य देकर आठ भाइयोंके साथ और धनदेव मित्रके साथ अपने पिताके समीप दीक्षा ले ली ॥७४॥ महान् तेजवाले ग्यारह हजार राजा और उसके सौ पुत्रोंने भी दीक्षा ले ली ॥७५॥

द्वादशाङ्गं श्रुतज्ञानं सोऽध्यगीष्टातिश्रद्धया ।
सिंहनिःक्रीडितादीनि चकारोरुतपांसि च ॥७६॥

जगदग्रैश्यपण्यानि त्रैलोक्यक्षोभणानि च ।
कारणानि च जैनस्य भावयामास षोडश ॥७७॥

चक्रवर्त्ती स्वकालं स्वपञ्चभावनकं तप ।
कृत्वान्ते श्रीप्रभं शैलमारुह्य प्राक्तनैः सह ॥७८॥

आराधनां तत्र चतुष्प्रकारामाराध्यमासानशनो जगाम ।
सर्वार्थसिद्धिं स निनाय तत्र कालं त्रयस्त्रिंशदथार्णवानाम् ॥७९॥

इति पुरुदेवचरिते पुराणसंग्रहे दामनन्द्याचार्यस्य कृतौ
सर्वार्थसिद्धिगमनो नाम द्वितीय सर्गः समाप्तः ।

निर्ग्रन्थ होकर उसने बड़ी श्रद्धाके साथ बारह प्रकारके श्रुतज्ञानका अभ्यास किया और सिंहनिष्क्रीडित आदि महान् तपोको किया ॥७६॥ उस वज्रनाभिने तीर्थंकरप्रकृतिको बाँधनेवाली उन सोलह भावनाओंकी भावना की जो कि जगत्के श्रेष्ठ ऐश्वर्योंके लिए मूल्य-स्वरूप है और त्रैलोक्यमे हलचल पैदा करनेवाली हैं ॥७७॥ उस चक्रवर्तीने स्वकाल और स्वभावनाके अनुसार तप किये और अन्तमे अपने साथियों सहित श्रीप्रभ पर्वतके शिखरपर चढ़ चार प्रकारकी आराधनाओंकी आराधना की। एक मासका उपवास व्रत लेकर समाधिमरण कर सर्वार्थ-सिद्धि विमानमे अहमिन्द्र हुए और वहाँ तैंतीस सागर की आयु पाई ॥७८-७९॥

इस प्रकार दामनन्दी आचार्य विरचित इस पुराणसार संग्रहके पुरुदेव-चरितमें सर्वार्थसिद्धि गमन नामक द्वितीय सर्ग समाप्त हुआ।

तृतीयः सर्गः

इह भारतवासस्य विजयार्द्धस्य दक्षिणे ।
तृतीयस्याः समायास्तु प्रान्ते सङ्ख्येयवत्सरे ॥१॥

त्रयोदशस्वतीतेषु क्रमात् कुलकरेषु च ।
ततः कुलकरो जज्ञे नाम्ना नाभिः सुरार्चितः ॥२॥ युग्मम् ॥

तद्देवी मरुदेवीति सर्वश्रीभिरुपासिता ।
गजेन्द्रादीन् वरान् स्वप्नांस्तस्या सन्दर्श्य षोडश ॥३॥

सर्वेन्द्रान् कम्पयन् स्थानाद्रूपमादाय गोपतेः ।
स्वर्गाग्रादवतीर्यासौ गां देव्याः प्राविशन् मुखम् ॥४॥ युग्मम् ॥

नाभयेऽकथयद् देवी श्रुत्वा देवोऽप्यभाषत ।
आवां त्रैलोक्यनाथस्य प्राप्स्यावो गुरुतामिति ॥५॥

श्रीविद्युद्दिक्कुमारीभी रक्षितः शातमातुरः ।
जज्ञे नाथस्ततःकाले त्रैलोक्यमभिकम्पयन् ॥६॥

आश्वागम्य सुरेन्द्रास्तं नीत्वा मन्दरमस्तके ।
अभिषेकं प्रचक्रुस्ते महर्द्ध्या क्षीरवारिभिः ॥७॥

स्तुत्वाऽऽनीय जनन्यङ्के निक्षिप्यानन्दनाटकम् ।
आक्रीड्येशं गुरूंश्चापि सम्पूज्य स्वालयान्ययु. ॥८॥

तिस्र. कोट्योऽर्धकोटी च वसुधारा दिने दिने ।
आजन्मनोऽपतद्दिव्या मासांस्तु दश पञ्च च ॥९॥

तृतीय सर्ग

इस भारतवर्षमे विजयार्द्धके दक्षिणमे तीसरे काल सुषम-दुषमाको वीतनेके जव कि संख्यात वर्ष शेष रह गये थे तव क्रमसे चौदह कुलकर हुए। उनमेसे तेरह कुलकरोका काल बीत जानेके वाद देवोसे पूजित नाभि नामका कुलकर हुआ ॥१-२॥

उसकी रानी मरुदेवी सभी श्री आदि छहकुमारिका देवियोसे सेवित थी अर्थात् श्री आदि देवियाँ उसकी सेवा करती थीं। उसने एक समय हाथी वैल आदि श्रेष्ठ सोलह स्वप्न देखे ॥३॥ तदनन्तर वह वज्रनाभिका जीव सभी इन्द्रोंके आसनोको कँपाता हुआ सर्वार्थसिद्धिसे च्युत हुआ तथा इस पृथ्वी मण्डलमे आकर वृषभ रूपसे, उस मरुदेवीके मुखमे प्रवेश किया ॥४॥ तव मरुदेवीने नाभिराजासे सव बातें कहीं और नाभिराजाने उत्तर दिया कि हम दोनो त्रिभुवन-वन्द्य तीर्थंकरके माता-पिता होवेगे ॥५॥

श्री ह्री आदि कुमारियोंसे माताके गर्भमे रक्षित वे भगवान् त्रैलोक्यको कम्पाते हुए यथासमय पर उत्पन्न हुए ॥६॥ तव इन्द्र आदिने शीघ्र आकर और भगवान्को सुमेरु पर्वतपर ले जाकर बड़े ठाठ-बाठके साथ क्षीरसागरके जलसे उनका अभिषेक किया। इसके बाद स्तुति करके उन्हें वापिस लाकर और माताकी गोदीमे विराजमान करके भगवान्की तथा उनके माता-पिताकी पूजा कर वे सब देवगण अपने-अपने धाम चले गये। पन्द्रह महीने अर्थात् गर्भ के छह मास पहलेसे लेकर भगवान्के जन्म होने तक प्रतिदिन स्वर्गसे साढ़े तीन करोड़ स्वर्ण-रत्नादिकी

अथ वैश्रवणो भक्त्या वासवस्याज्ञयाऽपि च ।
रयःकालानुयोगेन योगक्षेममुवाह स. ॥१०॥

देहो हेमनिभस्तस्य पञ्चचापशतोच्छ्रितः ।
बभूवाष्टसहस्रेष्टलक्षणव्यञ्जनाङ्कित· ॥११॥

यशस्वती-सुनन्दाभ्यां सुन्दरीभ्यां जगत्त्रये ।
रेमे च वल्गितस्ताभ्यां भाकान्तिभ्यामिवांशुमान् ॥१२॥

पुत्राणां शतमेकोनं सुतां चैकां यशस्वतीम् ।
सुषुवे बाहुबलिनं सुनन्दा सुन्दरीमपि ॥१३॥

अक्षराणि विभुर्ब्राह्म्या अकारादीन्यवोचत ।
वामहस्तेन सुन्दर्य्यां गणितं चाऽप्यदर्शयत् ॥१४॥

अन्यदा सुखमासीनं पुरुं नाभिप्रचोदिताः ।
उपतस्थुः प्रजा. सर्वा जीविकोपायमीप्सवः ॥१५॥

किं नाथ करवामेति स्थिता वीक्ष्यानुकम्पया ।
प्रजाभ्यो दर्शयामास कर्मशिल्पकलागुणान् ॥१६॥

तत. सुरगणा सेन्द्रा अभिषेकार्थमाययु. ।
नाभेयस्य प्रजानाञ्च वार्त्तासंस्थापनाय च ॥१७॥

मध्येऽर्धभरतस्याशु चक्रे वैश्रवण पुरम् ।
साकेतं नामत. ख्यातं विनीतजनतावृतम् ॥१८॥

पुरग्रामाकरखेटादिराष्ट्रपत्तनमण्डिताम् ।
विभज्य वसुधां चक्रुर्देवा देवेन्द्रशासनात् ॥१९॥

तद्वार्त्तां लोकयात्रां च कर्मोपकरणानि च ।
चक्रिरे व्यवहारांश्च मनुजानीप्सव सुरा. ॥२०॥

ततो राज्याभिषेकं ते कृत्वा भगवतः सुरा. ।
ददुस्त्रैलोक्यसाराणि दिव्यान्याभरणानि च ॥२१॥

वृष्टि होती रही ॥९॥ कुबेरने भक्तिसे और इन्द्रकी आज्ञासे उत्साहपूर्वक काल तथा ऋतुके अनुसार सब प्रकारका प्रबंध कर दिया था ॥१०॥ उन भगवान्‌का शरीर स्वर्णके समान कान्तियुक्त था। ऊँचाई पाँच सौ धनुष थी तथा शरीर एक हजार आठ शुभ लक्षण और व्यंजनोंसे युक्त था ॥११॥ तीनों जगत्‌में अति सुन्दरी यशस्वती और सुनन्दासे युक्त भगवान् ऐसे शोभित होते थे जैसे प्रभा और कान्तिसे संयुक्त सूर्य शोभित होता है ॥१२॥ यशस्वतीसे भरत आदि निन्यानवे पुत्रोंने और ब्राह्मी पुत्रने जन्म लिया। तथा सुनन्दासे बाहुबलि और सुन्दरीने जन्म लिया ॥१३॥ भगवान्‌ने अपनी पुत्री ब्राह्मीको दक्षिण हाथसे अकारादि अक्षर सिखलाये और बायें हाथसे सुन्दरीको गणित विद्या सिखाई ॥१४॥

एक समय सुखपूर्वक बैठे हुए ऋषभ भगवान्‌के पास, नाभि-राजा द्वारा भेजी गई सभी प्रजा, जीविकाका उपाय जाननेके लिए आई ॥१५॥ हे नाथ, हम क्या करें? ऐसा पूछनेपर दया-बुद्धिसे भगवान्‌ने प्रजाके लिए, कृषि आदि कर्म तथा शिल्पादि कलाओंको सिखलाया ॥१६॥ तदनन्तर देवगण इन्द्रो सहित ऋषभ भगवान्‌के राज्याभिषेक करनेके लिए तथा प्रजाके कुशल-क्षेमकी व्यवस्था के लिए आये ॥१७॥

कुबेरने शीघ्र ही आधे भरत क्षेत्रके बीचमें विनीत जनतासे परिपूर्ण साकेत नामसे प्रसिद्ध अयोध्या नगरको बसाया ॥१८॥ इन्द्रकी आज्ञासे देवोंने पृथ्वीका विभागकर उसे पुर, ग्राम, आकर, खेट, राष्ट्र पत्तन आदिसे सुशोभित बनाया ॥१९॥ उन कुशल देवोंने जगत्‌मे कृषि आदि कर्म, जीवन निर्वाहके उपाय और कार्य करनेके उपकरण–शस्त्रादिका बनाना सिखाकर लोक-व्यवहारको स्थापित किया ॥२०॥ तदनन्तर वे देवगण भग-वान्‌का राज्याभिषेक करके और तीन लोकमे सारभूत दिव्य वस्त्र-

राजन्त्रोग्रभोगेभ्यो दत्त्वा सन्नगराकरान् ।
दिशन्कुर्वादिकान्नाथ. शशास वसुधामिमाम् ॥२२॥

देवोपस्थापितान्भोगान् प्रत्यहं स मनोरमान् ।
नृपेभ्यः सोमप्रभादिभ्यश्चिरं रेमे विभाजयन् ॥२३॥

अलङ्काररसोपेतं नाटकाङ्कनयोत्कटम् ।
भक्त्येन्द्रशासनादेत्य नृत्यतीं देवनर्तकीम् ॥२४॥

नाम्ना नीलाञ्जनां साक्षाद् दर्शयन्तीमिवाङ्गजम् ।
निर्विवेद विभुर्वीक्ष्य सहसाऽभिनिचोदितः ॥२५॥

तदानीं बोधमायासुरेत्य लौकान्तिका जिनम् ।
कालः प्रवर्त्तयस्वेति धर्मतीर्थमिहेश्वर ॥२६॥

अथ सर्वेऽपि देवेशा ज्ञात्वा स्वासनकम्पनैः ।
परिनि क्रमणे पूजां चक्रुरेत्य महर्द्धिकाम् ॥२७॥

क्षिप्रं वैश्रवणः कृत्वा शिविकां चातिसुन्दरीम् ।
तदोपस्थापयामास शक्रोऽपीशं व्यजिज्ञपत् ॥२८॥

पुरुः पुत्रशतं राज्ये प्रतिष्ठाप्यापहृत्य च ।
आपृच्छ्यान्तःपुर चेश आरुरोह सुदर्शनाम् ॥२९॥

पूर्वं नृपगणोत्क्षिप्ता मुहुस्तां विबुधेश्वराः ।
अद. क्रन्दितशब्दोऽभूदूर्ध्वमुत्कृष्टनादितम् ॥३०॥

गीतनाट्योपहारैश्च त्रिदशैः साप्सरोगणै ।
सेव्यमानोऽथ सम्प्रापत्सिद्धार्थवनमीप्सितम् ॥३१॥

शिविकातोऽवतीर्याऽत्र वासांसि भूषणानि च ।
व्यजहात्पृथिवीञ्चेमां दोषिणीमिव योषितम् ॥३२॥

पञ्चमुष्टिस्ततः कृत्वा सन्तस्थे च दिगम्बर. ।
पार्थिवानां सहस्रैश्च चतुर्भि सह संयमे ॥३३॥

आभरण आदिको देकर स्वर्ग चले गये ॥२१॥ पुनः भगवान्‌ने नाथवंशी, हरिवंशी, उग्रवंशी और कुरुवंशी आदि राजाओंको विभिन्न नगर, देश आदि देकर पृथ्वीका शासन किया ॥२२॥ उन भगवान्‌ने देवों द्वारा किये गये अर्थात् लाये गये मनोहर भोगोंको सोमप्रभादि राजाओंमे बॉटते हुए चिरकाल तक सुख भोगा ॥२३॥

एक समय नानारस और अलंकारोसे युक्त और नाना हाव-भावोंसे सहित एक नाटक सभाके बीचमे इन्द्रकी आज्ञासे हो रहा था। वहॉपर साक्षात्कामदेवके रूपके समान नीलाञ्जना नामकी देवनर्तकी नृत्य कर रही थी। वह अचानक ही अदृश्य हो गई। यह देख प्रभुको वैराग्य हो गया ॥२४-२५॥ उसी समय स्वर्गसे लौकान्तिक देवोंने आकर उन्हें सम्बोधा और कहा कि हे प्रभु! इस क्षेत्रमे धर्मतीर्थका काल चलाइये ॥२६॥ तब सभी देवोंके आसन कम्पित हुए और उन्होंने भगवान्‌के वैराग्यको जाना। सबने आकर भगवान्‌की बड़े वैभवसे पूजा की ॥२७॥ तब कुबेरने शीघ्र ही एक सुन्दर पालकी बनवाकर उपस्थित की और इन्द्रने भगवान्‌से निवेदन किया ॥२८॥ उन भगवान्‌ने अपने सौ पुत्रोंको राज्यमें प्रतिष्ठित कर सब परिग्रह का त्याग कर दिया तथा अपने अन्तःपुरसे पूछ कर सुदर्शना नामकी पालकीमे चढ़े ॥२९॥ सर्व प्रथम राजागण पालकीको उठा कर चले, फिर देवता लोग आकाश मार्गमें लेकर चले। उस समय वहॉपर जय-जयकारके शब्दसे आकाश गूँज उठा ॥३०॥ देवांगनाओं सहित, गीत, नृत्य और नाना प्रकारके उपहार भेंट करते हुए वे देवगण भगवान्‌को मनोहर सिद्धार्थ वनमे ले गये ॥३१॥ यहाँ पालकीसे उतरकर भगवान्‌ने वस्त्र-आभूषणोंको तथा व्यभिचारिणी स्त्रीके समान इस पृथ्वीको छोड़ दिया ॥३२॥ इसके बाद भगवान्‌ने अपने केशोंको पॉच मुट्ठियोसे लोंच कर

अचेलत्वं च लुञ्चित्वं व्युत्सृष्टांगं सपिच्छकम् ।
एतदुत्सर्गलिंगं तु जगृहे मुनिपुङ्गव· ॥२४॥

जिनेन्द्रकेशानादाय भक्त्या पिटके शुचौ ।
निचिक्षेप समभ्यर्च्य सुरेन्द्रः क्षीरवारिधौ ॥२५॥

चतुर्भिरमलैर्ज्ञानैर्युक्तोऽपि त्रिदशार्चितः ।
यथोक्तमप्यतश्चक्रे तपोग्रं च द्विषड्विधम् ॥२६॥

पट्सु मासेष्वतीतेषु कच्छाद्याः पार्थिवोत्तमाः ।
क्षुत्पिपासोष्णशीताद्यैरसह्यैराकुलीकृताः ॥२७॥

अभूवंस्तापसाः केचित् पाण्डुपत्रफलाशिनः ।
पारिव्राज्यं तदाऽऽदत्त मरीचिश्च तृषार्दितः ॥२८॥ युग्मम् ॥

नमिश्च विनमिः सौख्याशावेत्येशमयाचताम् ।
दृष्ट्वा तौ धरणेशोऽप्यागत्य श्रेण्योरतिष्टिपत् ॥२९॥

जगदीशो बुभुक्षादीन्सहमानोऽपि तान् विभु· ।
धर्मसंस्थितये चक्रे गोचाराऽग्रगवेषणम् ॥४०॥

देवो नृपगणैर्भक्त्या ग्राम्यनागरराष्ट्रकैः ।
अर्चमानोऽथ वर्षेण प्रापद् गजपुरं क्रमात् ॥४१॥

राजा सोमप्रभो भ्राता श्रेयांश्च सहितावुभौ ।
अन्योन्यस्य स्वयं दृष्टान् स्वप्नान् स्म गदतस्तकौ ॥४२॥

मेरुं कल्पतरुं चन्द्रं रत्नद्वीप सुरध्वजम् ।
विद्युन्माला विमानानि विरञ्चिपुरुषोत्तमम् ॥४३॥

वयमद्राक्ष्म रात्र्यन्ते किमेषां फलमित्युभौ ।
सामान्यश्रेष्ठिसचिवौ चक्रतुः स्वप्नसंकथाम् ॥४४॥ युग्मम् ॥

चार-हजार राजाओंके साथ दिगम्बरी-दीक्षा धारण करली ॥३३॥ वस्त्र-रहितता केश-लुंचिता, अंग-निःस्पृहता और मयूरपिच्छिका, इन स्वाभाविक चिन्होंको मुनियोंमे श्रेष्ठ उन ऋषभदेवने ग्रहण किया ॥३४॥ इन्द्र, जिन भगवान्‌के केशोंको एक पवित्र पिटारेमें बन्द कर ले गया और अति सत्कार-पूर्वक क्षीर-सागरमे उन्हें समर्पित किया ॥३५॥ इन्द्रोंसे पूजित वे भगवान् स्वतः चार निर्मल ज्ञानोंसे युक्त थे तो भी उन्होंने यथाविधि बारह प्रकारके उग्रतपोंको किया ॥३६॥

छःमाह बीतनेके बाद भगवान्‌के साथ दीक्षित कच्छ, महाकच्छ आदि राजागण असह्य भूख, प्यास, गर्मी और सर्दीसे पीड़ित होने लगे ॥ ३७ ॥ उनमेंसे कितने तो पके फल, पत्ते खाने वाले साधु हो गये। भगवान्‌का पौत्र मरीचि प्याससे पीडित हो मिथ्यामत का प्रचारक परिव्राजक साधु हो गया ॥ ३८ ॥ एक समय कच्छ, महाकच्छके पुत्र नमि, विनमि भगवान्‌के पास याचना करने आये। तब धरणेन्द्रने उन दोनोंको विजयार्ध पर्वतकी उत्तर-दक्षिण श्रेणीका स्वामी बना दिया ॥ ३९ ॥ भूख-प्यास सहनेकी शक्ति होते हुए भी वे भगवान् धर्म-स्थापनाके निमित्त अर्थात् यतियोंकी चर्या प्रकट करनेके लिए छःमाहकी तपस्याके बाद गोचरीके लिए निकले ॥ ४० ॥ वे भगवान् नृपो द्वारा, ग्रामीणों द्वारा, नगरों तथा राष्ट्रों द्वारा भक्ति-पूर्वक पूजे जाते हुए क्रमसे एक वर्षमे हस्तिनागपुर पहुंचे ॥ ४१ ॥ वहांके राजा सोमप्रभ और उनके भाई श्रेयासने रात्रिमें कुछ शुभ स्वप्न देखे और आपसमें एक दूसरेसे देखे हुए स्वप्नोंको कहने लगे ॥४२॥ उन्होने कहा कि हम लोगोने स्वप्नमे मेरु, कल्पवृक्ष, चन्द्रमा, रत्नद्वीप, देवध्वजा, विद्युन्माला तथा विमान और ब्रह्माको रात्रिके अन्तिम प्रहरमें देखा है, इनका क्या फल होगा? इस प्रकार उत्तम मन्त्रियो-वाले उन दोनोंने अपने-अपने मंत्रियोसे स्वप्न कहे ॥ ४३–४४ ॥

आगमिष्यति नः कोऽपि द्रक्ष्यामो बन्धुसत्तमम् ।
त्रिषु लोकेषु विख्यातं भद्रं चाद्य भविष्यति ॥४५॥

अभूतपूर्वां भूतिं च श्रियं राजाऽऽलयस्य च ।
दिशां प्रसन्नतां चैव वीक्ष्य विस्मयमापतुः ॥४६॥

कथाभिः पुरुदेवस्याऽध्यासिताभ्यां पुनः सुखम् ।
ज्ञात्वोपस्थापयाञ्चक्रुर्वेलाभक्तं तु भाक्तिकाः ॥४७॥

भोक्तुं समुपविष्टाभ्यां रम्ये मणिमहीतले ।
एत्य सिद्धार्थतातोऽयमाख्यदागमनं विभोः ॥४८॥

यन्नामग्रहणं यस्मै नमश्चेत्युदितं पदम् ।
संसारतरणे शक्तं भक्तृणां नौरिवार्णवे ॥४९॥

यस्य चोदकमूर्धाभिषेकान्ते विबुधेश्वरः ।
यद्रूपदर्शनातृप्तो वज्री चाभूत्सहस्रदृक् ॥५०॥

रात्रिं दिवं कथा यस्य क्रियते भवदादिभिः ।
सोऽद्य प्राघूर्णकोऽस्माकं जगच्चन्द्र इहागमत् ॥५१॥

उदग्द्वारेण संविश्य पुरं नः करिराड्गतिः ।
चान्द्रीं च चर्यामास्थाय युगमात्रार्पितेक्षणः ॥५२॥

आदरोदितसम्भ्रान्तैः पादार्घ्यासनहस्तकैः ।
नरनारीगणैर्भक्त्या स्तुतवन्दितपूजितः ॥५३॥

इज्याञ्जलिनमस्कारैरनुभूतश्च नागरैः ।
गेहं गेहमटन्नीशः प्राविक्षन्नोऽजिरं पुरः ॥५४॥ त्रिकम् ॥

श्रुत्वा सपरिवारौ तौ तेनोक्तं प्रत्यगीयतुः ।
सम्भ्रान्तौ जिनचन्द्राय बुध-शुक्राविवेन्दवे ॥५५॥

प्रोद्गतादित्यदीप्तं च शरत्पूर्णेन्दुसौम्यकम् ।
अद्राष्टां भगवद्रूपं भूदिगाकाशभूषणम् ॥५६॥

हम लोगोंका कोई इष्टबन्धु आवेगा, हम अपने तीन लोकमें प्रसिद्ध श्रेष्ठ-बन्धुको देखेंगे, आज हमारा कल्याण होगा, ऐसा उन लोगोंने कहा ॥ ४५ ॥ वे दोनों, अपनी अभूतपूर्व विभूति को, राज-भवनकी शोभाको तथा दिशाओंकी स्वच्छताको देख आश्चर्य-चकित होगए ॥ ४६ ॥ जिस समय वे दोनों भगवान् ऋषभ-देवकी कथा कहते हुए बैठे थे कि प्रहरी लोगोंने भोजन करनेके समयकी सूचना दी ॥ ४७ ॥ सुन्दर मणियोंसे निर्मित स्थलपर भोजन करनेके लिए बैठे हुए उन दोनोको सिद्धार्थ नामक द्वार-पालने भगवान्के आगमनका समाचार दिया ॥ ४८ ॥ कि जिन भगवान्का नाम मात्र लेना, और जिनके नमस्कारके लिये कहे गये शब्द, भक्त लोगोंको ससारसे पार उतारनेके लिए समुद्रमे नौकाके समान हैं, जिनके जन्माभिषेकके बाद रूप देखनेमे अतृप्त होकर इन्द्रने सौ नेत्र बना लिए थे। जिनकी कथा आप लोग रात-दिन करते हैं वे जगत् के चन्द्र आज हमारे अतिथि बनकर यहाँ आये हुए हैं ॥४९–५१॥ गजके समान मस्त गतिसे चलते हुए उन्होने उत्तर ओरके दरवाजेसे हम लोगोके नगरमे प्रवेश किया है। वे चान्द्री चर्याका अवलम्बन कर चार हाथ प्रमाण भूमिको देखते हुए चले आरहे हैं ॥५१–५२॥ नगर-निवासी नर-नारीजनोंसे चरणोमे अर्घ्य-दान, आसन-प्रदान आदिके द्वारा आदर-सत्कार पाते स्तुति, वन्दना और पूजाको प्राप्त करते हुए, अञ्जलि-बद्ध नमस्कार करनेवाले नागरिकोसे मिलते हुए, घर-घर विहार करते हुए वे भगवान् हमारे आंगनमे प्रवेश कर रहे हैं ॥५३–५४॥

इस तरह सिद्धार्थसे कही इन बातोको सुनकर परिवार सहित वे दोनो जिन भगवान्के स्वागतके लिये सन्मुख गये। जैसे कि चन्द्रमाके स्वागतके लिए बुध और शुक्र जाते है ॥५५॥ उन दोनोंने, उगते सूर्यके समान कान्तिमान्, शरत् कालीन पूर्ण चन्द्रमा

कृत्वा प्रदक्षिणं नाथं चन्द्रार्काविव मन्दरम् ।
पादयोः पेततुर्मूर्ध्ना शरत्स्रग्धारकुण्डलौ ॥५७॥

मौनव्रतिकमापृच्छ्य सुखपृच्छां शिरस्करौ ।
विभोरागमनं काले चिन्तवन्तौ पुरः स्थितौ ॥५८॥

सा च लक्ष्मीवती देवी सपत्नीभि. सपुत्रिका ।
सग्रहा चन्द्रलेखेव चक्रे नाथं प्रदक्षिणम् ॥५९॥

श्रेयाननिमिषाक्षिभ्यां पश्यन्नञ्चितरोमभृत् ।
क्व मन्येऽद्राक्षमीदृक्तं रूपं प्रागित्यचिन्तयत् ॥६०॥

उपशान्तेन कान्तेन दीप्तेनाप्रतिघातिना ।
निभृतेनोर्जितेनातिजैनेनाद्भुनवर्ष्मणा ॥६१॥

बोधितोऽयं भवान् ज्ञात्वा दशाऽपीशस्य स्वस्य च ।
पादावाश्लिष्य बाहुभ्यां स्नेहान्नो ह्याजगाम स ॥६२॥ युग्मम् ॥

उत्थायाश्रूणि सम्मृज्य बुध्वाऽऽगमनकारणम् ।
धन्योऽद्यास्मीति सत्पात्रसम्प्राप्ते प्रीतमानसः ॥६३॥

प्रतिगृह्य समभ्यर्च्य सविधिज्ञो यथाविधि ।
पुण्ड्रेक्षुरसमादाय सकुम्भो जिनमब्रवीत् ॥६४॥

उद्गमोत्पाददोषैश्च विशुद्धमध कर्मभिः ।
त्रैलोक्यशान्तये नाथ प्रतीच्छ प्रासुक रसम् ॥६५॥

संशयघ्न मलापेतं व्रतस्वाध्यायविघ्ननुत् ।
स्वतन्त्रमिति चाप्तेभ पाणिपात्रम्प्रवर्तितम् ॥६६॥

के समान सौम्य, पृथ्वी, दिशा और आकाशके भूषण-स्वरूप, उन जिन भगवान्‌के रूपको देखा ॥५६॥ सुमेरु पर्वतकी जैसे चन्द्र-सूर्य प्रदक्षिणा करते हैं उसी तरह इन दोनोंने भगवान्‌की परिक्रमा की, तथा शरत्-कालके समान स्वच्छ माला और कुण्डल वाले उन दोनोंने शिर नवाकर उनके चरणोंमें प्रणाम किया ॥५७॥ शिरपर हाथ रखकर और उन मौनव्रती भगवान्‌से क्षेम-वार्ता पूछकर, भगवान्‌के सम्मुख उपस्थित वे प्रभुके योग्य काल मे आगमन के विषय मे सोचने लगे ॥५८॥

अपनी सपत्नियों तथा पुत्री सहित उस लक्ष्मीमती रानीने ग्रहो सहित चाँदनीके समान उन भगवान्‌की प्रदक्षिणा की ॥५९॥ हर्षसे पुलकित नेत्रवाला श्रेयान् राजा भगवान्‌को निर्निमेष नयनोंसे देखता हुआ सोचने लगा कि मैंने पहले ऐसे रूपको कहीं देखा है? ॥६०॥

ऋषभदेव के उस उपशान्त मनोहर दीप्तिमान् सुन्दर अप्रतिहत तेजस्वी जितेन्द्रिय शरीरके प्रभावसे प्रबोधको प्राप्त हुआ, अर्थात् उसे जातिस्मरण हो आया। अपने और भगवान्‌के पूर्वले दश भवोंको जानकर भगवान्‌के चरणोंसे लिपट गया और सोचने लगा कि ये भगवान् हमारे स्नेहसे ही यहाँ आये है ॥६१-६२॥ उठकर आनन्द-अश्रुओंको पोंछकर तथा भगवान्‌के आनेके कारणको जानकर प्रसन्न-मन हो कहने लगा कि ऐसे सत्पात्रको पा मैं धन्य हूँ ॥६३॥ क्रिया विधिको जानने वाले उस श्रेयांसने विधि-पूर्वक उनका सत्कार और पूजाकर कलशमे गन्नेके रसको लेकर जिन भगवानसे निवेदन किया ॥६४॥ हे नाथ उद्गम, उत्पाद आदि दोषोंसे तथा अधः कर्मसे रहित विशुद्ध इस प्रासुक रसको त्रैलोक्यकी शान्तिके लिए लीजिए ॥६५॥ भगवान्‌ने "यह आहार संशयको दूर करनेवाला है, उद्गमादि दोषोंसे रहित है, व्रत और

प्रतिलब्धे जिनेन्द्रेऽथ श्रेयसा सहसाम्बरे ।
अहो दानमहो दानमिति शब्दो महानभूत् ॥६७॥

सुरदुन्दुभयो नेदुः सुरभिः पवनो ववौ ।
अपतद्वसुधारा च पूरयन्ती महीतलम् ॥६८॥

शिरःकम्पांगुलिस्फोटहस्तभ्रामणनिःस्वनैः ।
साधु साध्विति देवैः खात्पुष्पवृष्टिश्च पातिता ॥६९॥

स्वल्पप्रमाणभिक्षां तां तप.सयमरक्षिकाम् ।
आदायाऽभ्यर्चितो नाथो निर्गत्योद्यानमाश्रयत् ॥७०॥

धर्मतीर्थंकरे याते दानतीर्थंकरं सुराः ।
महयामासुराघोष्य पात्रदानफल महत् ॥७१॥

ततो नृपगणाः श्रुत्वा महती देवघोपणाम् ।
पूजयामासुरागत्य दानधर्मस्य नायकम् ॥७२॥

प्राप्तराज्याभिषेकस्तै. पृष्टो नरगणेश्वरै. ।
कथयामास तेभ्योऽसावितिहासं यथागतम् ॥७३॥

पुरुदेवोऽपि कुर्वंस्तत्तपश्चित्रैरभिग्रहै ।
प्रापद् वर्पसहस्रेण पूर्वतालपुरं क्रमात् ॥७४॥

न्यग्रोधपादपस्याध. सुध्याने शकटाऽमुखे ।
क्षपकश्रेणिमारूढः शुक्लध्यानपरायणः ॥७५॥

घातिकर्माणि चत्वारि मोहादीनि प्रहत्य सः ।
प्रापदार्हन्त्यमत्यैश्वर्यं त्रैलोक्यक्षोभणं विभुः ॥७६॥

स्वासनस्पन्दनैरिन्द्रा ज्ञानोत्पत्तिं स्म जानते ।
शङ्खभेरिमृदङ्गादिघण्टाभिश्चेतरे सुराः ॥७७॥

स्वाध्यायके विघ्नका नाशक है, स्वतन्त्र है," ऐसा विचार कर उसे ग्रहण करनेके लिए अपना अपना पाणिपात्र पसार दिया ॥६६॥ श्रेयांस द्वारा प्रदत्त दानको जिनेन्द्र द्वारा ग्रहण करनेपर सहसा आकाशमे धन्य दान, अहो दान ! ऐसा महान् शब्द हुआ ॥६७॥ उस समय देवताओंकी दुन्दुभियाँ बजने लगीं, सुगन्धित पवन चलने लगा और जगतीतलको ढँकनेवाली धनराशि स्वर्गसे बरसने लगी ॥६८॥ शिर कँपाते हुए, अंगुलियोंसे शब्द करते, ताल ठोकते और हाथ घुमाते हुए देवोंने "बहुत अच्छा, बहुत अच्छा" कहते हुए आकाशसे पुष्पवृष्टि की ॥६९॥ तप और संयमकी रक्षा करनेवाली भिक्षाको थोड़ी मात्रामें लेकर उन लोगोंसे पूजित वे भगवान् निकलकर उद्यानमें आये ॥७०॥ धर्म-तीर्थको चलाने वालेके चले जानेपर दान-तीर्थके प्रवर्तक उस श्रेयांसकी देवोने सत्पात्र-दानकी महिमाको घोषित करते हुए पूजा की ॥७१॥ इसके बाद उस महान् देव-घोषणाको सुनकर राजा लोगोने आकर दान-धर्म-प्रवर्तक श्रेयांसकी पूजा की ॥७२॥ उन लोगोंने श्रेयांसका राज्याभिषेक किया और पूछा तब राजा श्रेयांसने पूर्व-जन्ममें हुए सब वृत्तान्तको सुनाया ॥७३॥

भगवान् आदिनाथने भी नाना प्रकारके अभिग्रहोसे[1] तप करते हुए एक हजार वर्ष विताये। तथा विहार करते हुए क्रमसे पूर्वतालपुर नगर पहुँचे ॥७४॥ वहाँ ध्यानके साधन-स्वरूप शकट नामके उपवनमे वटवृक्षके नीचे भगवान् शुक्ल ध्यानमे लवलीन हो क्षपकश्रेणीमें आरूढ़ हुए अर्थात् क्षपक श्रेणी पर चढ़े ॥७५॥ मोहादिक चार घातिया कर्मोंका नाशकर भगवान्ने त्रैलोक्यको हर्षित करने वाले परम ऐश्वर्यशाली अर्हन्त पद को प्राप्त किया ॥ ७६ ॥ अपने आसनके कँपनेसे इन्द्र-लोगोंने भग-

१ भोजनके समय अटपटी प्रतिज्ञाके लेनेको अभिग्रह कहते हैं।

प्राप्यानीकविमानैः स्वैः कृतादरविभूषणाः ।
विभूतिं तपसो जैनीं ददृशुस्ते सविस्मयाः ॥७८॥

विरच्य प्रातिहार्याणि पूजां चक्रुः सुरासुराः ।
गीतनृत्यस्तवाऽऽतोद्यैः प्रणमन्तः सयोषितः ॥७९॥

पुत्र-कैवल्य-चक्राणां निशम्योत्पत्तिमेकदा ।
भरतोऽगान्नृपैः सार्धं वन्दितुं परमेश्वरम् ॥८०॥

प्रातिहार्यैरथाऽष्टाभिश्चतुर्भिस्त्रिंशता च सः ।
अतिशयैश्च संयुक्तं ववन्दे परमेश्वरम् ॥८१॥

दृष्ट्वा वृषभसेनस्तं तत्पुरे भरतानुजः ।
प्रव्रज्याऽऽपद् गणेशत्वमभिषिक्तो नृदेवपैः ॥८२॥

सानुजाय जयायैश्यं दत्वा कुरुधराधिपौ ।
श्रेयान् सोमप्रभश्चेशं शरणं तौ स्म गच्छतः ॥८३॥

ब्राह्मी ससुन्दरी तुष्टा प्रपद्य शरणं पुरुम् ।
अभिषेकमवाप्याभूदार्यिकाणां पुरस्सरी ॥८४॥

याऽद्या निषद्या वृषभस्य शिष्या बभूव सङ्घोऽपि चतुःप्रकारः ।
रराज देवासुरसङ्घमध्ये ज्योतिर्वृतश्चन्द्र इवोर्जमास ॥८५॥

इति पुरुदेवचरिते पुराणसंग्रहे भगवतः केवलज्ञानोत्पत्तिर्नाम तृतीयः सर्गः समाप्तः ।

वान्को "केवलज्ञानकी उत्पत्ति हुई है" यह जाना। दूसरे भवन-वासी, व्यन्तर तथा ज्योतिषीदेवोंने भी अपने भवनोंमे शंख, भेरी, मृदग और घण्टादिके वजनेसे केवलज्ञानकी उत्पत्तिको जाना। वे सब अपने-अपने अनीक जातिके देवोंसे रचित विमानोंमें खूव सज-धज कर आये और जिन भगवान्के तपो-जनित विभूतिको अर्थात् समवसरणके वैभवको देखकर आश्चर्य चकित हुए ॥७७–७८॥ अष्ट प्रातिहार्योंकी रचना करके देवाङ्गनाओ सहित प्रणाम करते हुए देव असुरोंने गीत, नृत्य, स्तोत्र और वाद्योंसे भगवान्की पूजा की ॥७९॥ भरत चक्रवर्तीने एक कालमे ही घरमे पुत्रकी, आयुधागारमे चक्ररत्नकी और भगवान्को केवल-ज्ञानकी उत्पत्ति सुनी। तब सर्वप्रथम महाराज भरत राजाओंके साथ भगवान्की वन्दना करनेके लिए गये ॥८०॥ वहाँ आठ प्रातिहार्य और चौंतीस अतिशयसे युक्त भगवान्की उन्होंने वन्दना की ॥८१॥ भरतके छोटे भाई वृषभसेनने भगवान्के दर्शन कर उनके सामने ही दीक्षा ले ली, और नरेन्द्रो तथा देवेन्द्रो द्वारा अभिषिक्त हो गणधर पद पाया ॥८२॥ कुरुवंशी श्रेयांस और सोमप्रभ दोनो भाइयोंने अपने राज्यको जयकुमार और उसके छोटे भाईको देकर और भगवान्की शरणमे आकर दीक्षा धारण कर ली ॥८३॥ सुन्दरी और ब्राह्मीने भी अतिसन्तुष्ट हो आदिनाथ भगवान्की शरण ली और मनुष्य तथा देवोंसे अभिषिक्त होकर आर्यिकाओंमें अग्रणी हुई ॥८४॥ भगवान् आदिनाथके समवशरणमें इस प्रकार चार प्रकारका संघ बना और उन देव-असुरादिके तथा चतुर्विध संघके बीचमे भगवान् ज्योतिषियोंसे घिरे हुए कार्तिक मासके चन्द्रमाके समान सुशोभित हुए ॥८५॥

इस प्रकार पुराणसारसंग्रहके पुरुदेवचरितमें केवलज्ञानोत्पत्ति नामका तृतीय सर्ग समाप्त हुआ।

चतुर्थः सर्गः

अथ कृत्वाऽर्हतः पूजामष्टाहं त्रिदशैः सह ।
भरतो भारत वास्यं विजिगीषुः ससैन्यकः ॥१॥

कृत्वा चक्रमहं पश्चाद्दध्यौ चक्रपुर सरः ।
गत्वाऽनुगङ्गमाद्वारमकरोद् भक्तमष्टमम् ॥२॥

प्रविश्योद्घाटिते द्वारे रथमारुह्य कल्पितम् ।
युक्त पवनवेगाभ्यां वाजिभ्यामजितञ्जयम् ॥३॥

तुम्बदघ्नं महाबाहुरवगाह्य महार्णवम् ।
वैशाखस्थानमास्थाय वज्रकाण्डधनुष्करः ॥४॥

अमोघ शरमादाय व्यमुचन्नामकाङ्कितम् ।
प्रगत्याऽशनिवेगोऽस्तो द्वादशे योजनेऽपतत् ॥५॥ त्रिकम् ॥

तत्प्रपातेन सम्भ्रान्तो मागधो भवनाधिपः ।
उत्पन्नश्चक्रवर्तीति बुबुधे वीक्ष्य नामकम् ॥६॥

निन्दित्वाऽल्पं स्वकं धर्म्मं भग्नमानः सुराधिप. ।
साराण्यग्राणि रत्नानि गृहीत्वा स्वोचितानि सः ॥७॥

पृथिवीसारहारं च मुकुटं कुण्डले अपि ।
प्रागुपस्थापयाञ्चक्रे वस्त्रतीर्थोदकानि च ॥८॥ द्विकम् ॥

किमहङ्करवाणीति प्रतिगृह्य विशांपतिम् ।
विश्वस्त' प्राविशत्तेन भरतोऽपि विनिर्ययौ ॥९॥

चतुर्थ सर्ग

देवताओंके साथ आठ दिन तक भगवान्की पूजा कर, सेना सहित वह भरत भारतवर्षको जीतनेका इच्छुक हुआ ॥ १ ॥ पश्चात् उसने घर आकर चक्ररत्नकी पुजा की और चक्रको आगेकर गगाके किनारे-किनारे उसके दरवाजे तक गया और वहाँ उसने अष्टम भक्त अर्थात् तेला या तीन दिनका उपवास किया ॥२॥ फिर उसने दरवाजेके खुलनेपर पवनके समान वेगवाले घोड़ोंसे जुते हुए देव-रचित अजितजय नामके रथमे बैठकर प्रवेश किया। विशालबाहु वह भरत बारह योजन प्रमाण महासमुद्रको पारकर वैशाख नामके आसनसे स्थित हो उसने वज्रकाण्ड नामक धनुषको संभाला, अपने नामसे अंकित अमोघ बाणको उसने छोड़ा और उल्कापात जैसे वेग वाला वह बाण १२ योजनपर जा गिरा ॥३-५॥ उस बाणके गिरनेसे मागध नामका भवनवासी देव घबड़ा गया और बाण पर लिखा नाम बाचनेसे उसने जाना कि चक्रवर्ती संसारमे उत्पन्न हो गया है ॥६॥ गलित मान होकर वह देव अपने अल्प पुण्यकी निन्दा करता हुआ अपने योग्य तथा उत्तम-उत्तम मणियोंको लेकर, पृथिवीमें श्रेष्ठ हारको तथा कुण्डलो और मुकुटको लेकर, नाना वस्त्राभूषण और नाना तीर्थोंके जल सहित भरतके सामने आ उपस्थित हुआ ॥७-८॥ "मै क्या करूँ" इस प्रकार कहते हुए उस देवने भरतका सत्कार किया तथा उनकी अनुज्ञासे विश्वस्त होकर वह अपने स्थानको चला गया। भरतराजने भी वहाँसे प्रस्थान किया ॥९॥

श्रावयन् दाक्षिणात्यांश्च नृपतीन् व्यन्तरांस्तथा ।
गत्वाऽनुसागरं द्वारं वैजयन्तमथाऽऽसवान् ॥१०॥

नाम्ना वरतनुं तत्र देवं पूर्ववदाह्वयत् ।
सोऽपि चूडामणिञ्चैव ग्रैवेयकमुरस्सरम् ॥११॥

वीरांगदे च कटके नंद्यावर्त्तं च सूत्रकम् ।
उपानीयाञ्जलिं कृत्वा किङ्करः समुपस्थितः ॥१२॥ युग्मम् ॥

अपाच्यान् स्ववशीकुर्वन्नाजगामानुवेदिकम् ।
श्रावयन् देवभूपांश्च सिन्धुद्वारमुपेयिवान् ॥१३॥

गंगाद्वारविधानेन प्रभास नामतः सुरम् ।
आनम्य जगृहे तस्मात् सन्तानं माल्यदामकम् ॥१४॥

मुक्ताजालञ्च मौलिञ्च रत्नचित्रञ्च हैमकम् ।
पूजां तीर्थोदकं चापि प्रतिगृह्योत्तरामगात् ॥१५॥

चक्ररत्नानुमार्गेण विजयार्द्धस्य वेदिकाम् ।
प्राप्तं स्वावधिना ज्ञात्वा सोपवासं नरेशपम् ॥१६॥

विजयार्द्धकुमारोऽपि सिंहासनमनुत्तरम् ।
तत्र चामरयुग्मानि गृहीत्वाऽनुपमानि सः ॥१७॥

भृंगारं कुम्भतोयं चाऽप्यभिषेक च चक्रिणे ।
उपस्थाप्य तवास्मीति पूजितः स्म निवर्तते ॥१८॥ त्रिकम् ॥

पूजां चक्रस्य कृत्वाऽऽयात्स तिमिश्रगुहामुखम् ।
तद्वासी कृतमालोऽपि तिलकाद्यांश्चतुर्दश ॥१९॥

अलंकारान् प्रगृह्याऽसौ तवाऽहमिति चाश्रृणोत् ।
आज्ञप्तो राजराजेन ततो योद्धा चमूपति ॥२०॥

कुमुदावेलकं नाम वाजिरत्नं शुकप्रभम् ।
आरुह्य दण्डरत्नेन गुहाद्वारमताडयत् ॥२१॥ त्रिकम् ॥

तदनन्तर दक्षिणवासी राजाओं और व्यन्तरोंको आज्ञा करता हुआ वह चक्रवर्ती समुद्रके किनारे-किनारे जाकर वैजयन्त द्वारके पास पहुंचा ॥१०॥ वहाँ वरतनु नामक देवको मागध देवके समान ही बुलाया। वह भी चूड़ामणि रत्न, ग्रैवेयक हार, वीरोंके केयूर, कड़े तथा नंद्यावर्त नामकी करधनीको भेंट करता हुआ हाथ जोड़े सेवकके रूपमे उपस्थित हुआ ॥११-१२॥ दक्षिण तरफ रहनेवाले लोगोंको अपने वशमें करता हुआ जम्बूद्वीपकी वेदिकाके किनारे किनारे वह चक्रवर्ती चला और अनेकों देवो और राजाओपर आज्ञा करता हुआ सिन्धु नदीके द्वार पर आ पहुँचा ॥१३॥ गंगाद्वारके विधानके समान उस चक्रवर्तीने यहाँ प्रभास नामके देवको वशमें किया और उस देवने सन्तानक आदि कल्पवृक्षोंके पुष्पोंकी माला, मोतियोका ढेर, मुकुट, रत्नोसे जटित स्वर्णमाला तथा तीर्थोदक, भेटमे दिये और इस प्रकार उससे पूजा-प्रतिष्ठा पाकर भरतराज उत्तर दिशाको गये ॥१४-१५॥

चक्ररत्नके पीछे-पीछे चलकर वह चक्रवर्ती विजयार्द्ध पर्वतकी वेदिकाके पास पहुँचा। वहाँ उस चक्रवर्तीने उपवास किया। तब वहाँके देव विजयार्द्धकुमारने अपने अवधिज्ञानसे चक्रवर्तीका आगमन जानकर उत्तम सिंहासन, अनुपम चमरोंके युगल और भारी चक्रवर्तीको प्रदान किया तथा जलके घड़े लाकर उनका अभिषेक किया "मैं तुम्हारा ही दास हूँ" ऐसा निवेदन कर वह देव चला गया ॥१६-१८॥ इसके बाद चक्ररत्नकी पूजा कर वह चक्रवर्ती विजयार्ध पर्वतकी तिमिश्र गुफाके द्वार पर पहुँचे। वहाँ रहनेवाले कृतमाल देवने तिलक आदि चौदह प्रकारके आभूषण भेंटमें दिये और "मैं तुम्हारा ही सेवक हूँ" ऐसा निवेदन कर चला गया। तदनन्तर चक्रवर्तीकी आज्ञासे उस युद्ध-विशारद सेनापतिने हरे वर्णवाले कुमुदावेलक नामके अश्वरत्न पर चढ़कर

तत उद्घाटिते द्वारे प्राविशत्सह सेनया ।
सन्नह्यारुह्य राजेन्द्रो गजं विजयपर्वतम् ॥२२॥

नाभून्नक्तदिवं भासा काकिणीमणिरत्नयोः ।
कामवृष्टिर्गृहपतिर्भद्रास्य स्थपतिश्च तौ ॥२३॥

उन्मग्नजलनामा च निमग्नजलवाहिका ।
गुहामध्ये महानद्यो· स्कन्धावारोऽभवत्तयो· ॥२४॥

कारयामासतु क्षिप्र सङ्क्रमं सरितोरुभौ ।
तेनाऽतीत्योत्तरद्वार सम्प्राप्योद्घाट्य पूर्ववत् ॥२५॥

भारतोत्तरद्वारे हि सन्निविष्टा महाचमू· ।
दृष्ट्वाऽऽवर्तचिलातास्तामभिजग्मुर्महाबला· ॥२६॥ चतुष्कम् ।

ततोऽश्वरत्नमारुह्य चमूपतिरलङ्घ्यधी· ।
द्रावयामास तानाशु मेघानिव महानिला ॥२७॥

तेषां मेघमुखा नागा स्वोचिता· कुलदेवता· ।
ततस्ताश्शरण जग्मु शयित्वा दर्भसंस्तरे ॥२८॥

ततो मेघमुखा वृष्टि समावृत्य महाम्बुधे ।
ववर्षुर्मुष्टिमात्राभिर्धाराभिस्ते चमूम्प्रति ॥२९॥

दृष्ट्वा वृष्टि निर्धीरस्तां सविद्युद्गर्जिताशनिम् ।
चकारोपर्यधस्ताच्च रत्ने द्वे छत्रचर्मणी ॥३०॥

द्विषड्योजनविस्तीर्णा प्लवमानाऽम्बु वाहिनी ।
... ... सप्ताहं मार्गेऽन्तर्निमज्जवत् ॥३१॥

ततो निरिक्तो ... गणदेवैरभिद्रुता· ।
मेघाश्च ... ... वृष्टि· युगान्तरे ॥३२॥

दण्डरत्नसे गुहा-द्वारका भेदन किया ॥ १९–२१ ॥ तब दरवाजा खुलने पर, चक्रवर्तीने लड़ाईकी तैयारी कर सेनाके साथ विजयपर्वत नामके हाथीपर चढ़कर उसमे प्रवेश किया। काकणीरत्न और मणिरत्नकी कान्तिसे उस गुफामे रात-दिनका विभाग नहीं मालूम पड़ता था। उस गुफाके भीतर उन्मग्नजला और निमग्नजला नामकी दो नदियाँ थीं। उनके किनारे सेनाका पड़ाव पड़ा था। कामवृष्टि नामके गृहपति और भद्रमुख नासके स्थपतिने शीघ्र ही उन दोनो नदियोपर पुल बना दिया। जिस द्वारा उन दोनों नदियोको पारकर वे सब उत्तर दरवाजेके पास गये और पूर्वके समान ही उस दरवाजेको भी खोला ॥२२–२५॥

भरत क्षेत्रके उत्तर द्वारपर आई हुई उस बड़ी सेनाको देख कर बड़े पराक्रमवाले आवर्त और चिलात म्लेच्छ राजाओंने उस पर चढ़ाई कर दी ॥२६॥ इसके बाद अलंघ्यबुद्धिवाले उस सेनापतिने अश्वरत्न पर चढ़कर उन सबको शीघ्र ही, जैसे प्रबल वायु मेघोको भंग करता है, उसी तरह भंग कर दिया ॥२७॥ उनकी कुल परम्परासे आये हुए उन म्लेच्छोंके मेघमुख और नागमुख नामके नागकुमार कुलदेवता थे। उनकी उन्होने आराधना की और उस कालमे वे कुशासनपर शयन करते थे ॥ २८॥ तब मेघमुख नामके देवोने बड़े-बड़े बादलोसे आकाशको ढँककर चक्रवर्ती-की सेना पर मूसलाधार वर्षा की ॥२९॥ उस चक्रवर्तीने तड़तड़ाती हुई बिजली सहित उस वृष्टिको देखकर ऊपर छत्ररत्न तथा नीचे चर्मरत्न बिछा दिया ॥३०॥ बारह योजन तक फैली हुई तथा पानीके बीचमें तैरती हुई वह सेना सात दिन तक समुद्रमें डूबे हुए अण्डेके समान मालूम पड़ती थी ॥३१॥ तब चक्रवर्ती अति क्रुद्ध हुआ। इस पर गण-देवताओंने उन मेघमुख देवोको डरा कर भगा दिया और क्षणभरमे वृष्टि बन्द हो गई ॥३२॥ मेघमुख

उक्ता मेघमुखैर्नागैश्चिलाताश्चक्रवर्तिनम् ।
जग्मुः शरणमादाय कन्या मृगाङ्कलोचनाः ॥३३॥

किं वयं करवामेति प्रणतान्वीक्ष्य चक्रभृत् ।
मा भैषी इत्यनुरक्तो ययौ सिन्ध्वनुवेदिकम् ॥३४॥

सिन्धुदेवी ततो ज्ञात्वा सिन्धुकूटनिवासिनी ।
धर्मकुम्भसहस्रेण स्नपयित्वा नरोत्तमम् ॥३५॥

तस्मै भद्रासने दिव्ये पादपीठयुते ददौ ।
ततो हेमवतो मूलं स व्यमुञ्चदनीकिनीम् ॥३६॥ युग्मम् ।

शयानो दर्भशय्यायामुपोषितमथाष्टकम् ।
धृत्वा तीर्थोदकैः स्नात्वा कृतकौतुकमंगल' ॥३७॥

सन्नह्य विधिनाऽऽरुह्य रथं साश्वमलङ्कृतम् ।
वज्रकाण्डधनु.पाणिश्चक्ररत्नपुर सर. ॥३८॥

क्षुल्लकं हिमवत्कूट यस्यां दिशि ततोऽगमत् ।
यदुक्तं स्थानमास्थाय वाणं तूणीरतोऽग्रहीत् ॥३९॥ त्रिकम् ।

भो भो श्रृणुत सर्वेऽपि मद्देशस्य निवासिन ।
सुवर्णा नागभूता वेत्युक्त्वा स व्यसृजच्छरम् ॥४०॥

योजनानां द्विपद्ध गत्वा नामकाङ्कः पपात स' ।
ज्ञात्वाऽतो हेमवद्वासी कुमारश्चक्रवर्त्तिनम् ॥४१॥

आदायोपधिमालां च सगोशीर्षं च चन्दनम् ।
दत्वाऽस्मै पूजयित्वा च तच्छासनरतोऽभवत् ॥४२॥ युग्मम् ।

मुक्त्वा हैमवतं देवमायाद् वृषभपर्वतम् ।
तत्स्थानावलिखद्युक्त काकिण्या नामकं स्वकम् ॥४३॥
पुरुदेवस्य पुत्रोऽहं भरतो राजराडिति ।
प्रोवाचोच्चै रथाऽगच्छद्विजयार्द्धस्य वेदिकाम् ॥४४॥

नामक उन नागकुमार देवोंके कहने पर वे म्लेच्छ राजागण अपनी कन्याओंको भेट लेकर चक्रवर्तीकी शरण मे गये ॥३३॥ "हम लोग क्या आज्ञा पाते" इस प्रकार नम्रीभूत उन्हें देखकर चक्रवर्तीने "डरो मत" ऐसा कहकर और अनुरागयुक्त हो वह सिन्धु नदीकी वेदिकाके किनारे-किनारे चला ॥३४॥

तव सिन्धु नदीके कूटपर रहनेवाली जानकर सिन्धुदेवीने उस चक्रवर्तीको हजार स्वर्ण-कलशोसे स्नान कराके उसके लिए पादपीठ-से युक्त दो भद्र सिंहासन दिये। फिर इसके वाद उसने सेनाको हिमवान् पर्वतके तटकी ओर जानेकी आज्ञा दी ॥३५-३६॥

वहाँ कुशोकी शय्यामें शयन किया तथा अष्टोपवास धारणकर उस चक्रवर्तीने तीर्थोंसे लाये गये जलसे स्नान किया। फिर प्रसन्न-चित्त हो मगलविधि की और युद्धके लिए तैयार हुआ। विधिपूर्वक सजे हुए उत्तम अश्वरथमे वैठकर वह चक्रवर्ती चक्ररत्नको आगे करके हाथमे वज्रकाण्ड नामक धनुष लेकर उस दिशाकी ओर गया जिस ओर छोटा हिमवान् कूट था। और वहाँ युक्त आसनसे स्थित होकर चक्रवर्तीने अपने तरकशसे वाणको निकाला ॥३७-३९॥ तथा "रे रे मेरे देशमे निवास करनेवाले सुवर्णकुमार और नाग-कुमारो सुनो" यह कहते हुए वाण छोड़ दिया ॥४०॥ नामसे अंकित वह वाण वारह योजन जाकर गिरा। तब वहाँ रहनेवाले देवने चक्रवर्तीको आया हुआ जाना और औषधि माला तथा गोशीर्ष और चन्दन लाकर उसे भेट चढ़ाई तथा पूजा की और उसके शासनको स्वीकार कर लिया ॥४१-४२॥

अनन्तर हिमवत कूटको छोड़कर वह चक्रवर्ती वृषभाचल पर आया। उस पर्वतकी शिखरपर उसने काकणीरत्नसे अपना नाम लिखा "मैं पुरुदेवका पुत्र चक्रवर्ती भरत हूँ" इस प्रकार घोषणा करता हुआ वह विजयार्द्ध पर्वतकी वेदिकाके पास गया ॥४३-४४॥

तत्रोपवासितं ज्ञात्वा द्वितयश्रेणिवासिनौ ।
नमिश्च विनमिस्तूर्णं सह गान्धारपन्नगै. ॥४५॥

अन्यायन्नादाय रत्नानि भरत चोपनिन्यतु ।
प्रतिगृह्य सुभद्रां तां महद्धर्या तावपूजयत् ॥४६॥ युग्मम् ।

विद्याधरान् वशीकृत्य गतो गङ्गानुवेदिकम् ।
चकाराऽत्राष्टमं भक्तं दर्भसंस्तरशायकः ॥४७॥

गङ्गादेवी ततो ज्ञात्वा गङ्गाकूटनिवासिनी ।
रत्नकुम्भसहस्रेण स्नापयित्वा यथोचितम् ॥४८॥

सपादपीठके तस्मै रत्नसिंहासने ददौ ।
विजयार्द्धोत्तरावासानानाययत्ततोऽन्यपान् ॥४९॥ युग्मम् ।

म्लेच्छराजसहस्राणि विनाम्याष्टादशैव स. ।
तेभ्यश्चादाय रत्नानि खण्डप्रपातमाययौ ॥५०॥

सन्निवेश्य महासेनामुपोषितमथाष्टमम् ।
विज्ञाय नाट्यमालस्तु देवोऽलङ्कारभाण्डकम् ॥५१॥

नागरूपे च वै कण्ठ्ये विद्युदाभे च कुण्डले ।
दत्त्वा तस्मै प्रसादेश किङ्कर्तव्यमिति स्थित. ॥५२॥

अयोध्यः पूर्ववद् गत्वा गुहाद्वारमपावृणोद् ।
प्रवेशो निर्गमश्चास्य सिन्धुनिर्भेदवद् भवेत् ॥५३॥

दक्षिणादथ निर्गत्य भागीरथ्या गुहामुखात् ।
विजित्य भारतं वास्य सम्पूर्णं नरेश्वरः ॥५४॥

षष्ट्या वर्षसहस्रैः स प्रस्थित. स्वपुरीमुख ।
तत. सुदर्शनं चक्रं प्रवेष्टुं स्म न वाञ्छति ॥५५॥ युग्मम् ।
बुद्धिसागरनामानं पृच्छति स्म पुरोधसम् ।
किमर्थं चक्ररत्नं न· प्रवेष्टुं नैतदिच्छति ॥५६॥

वहाँपर उसने उपवास किया। यह मालूम कर दोनो श्रेणियोंमे रहनेवाले नमिकुमार और विनमिकुमार विद्याधरोंने गन्धार और पन्नग जातिके विद्याधरोंके साथ शीघ्र आकर अनेक श्रेष्ठ रत्न तथा सुभद्रा नामके स्त्रीरत्नको भी भेट किया। अनन्तर चक्रवर्तीने सुभद्राको स्वीकार कर उन दोनोका सत्कार किया ॥४५-४६॥

इस तरह विद्याधरोको वशमे करके वह गंगा नदीकी वेदिकाकी ओर चला और वहाँ कुशासनपर सोते हुए उसने अष्टोपवास किये ॥४७॥ गंगाके कूटमे रहनेवाली गगादेवीने यह जानकर उस चक्रवर्तीका हजार सोनेके कलशोसे अभिषेक कराया। तथा पादपीठ सहित रत्नजटित दो सिंहासन भेट दिये तथा विजयार्द्धकी उत्तर श्रेणीमे रहनेवाले अन्य राजाओंकी खबर दी ॥४८-४९॥

इसके बाद चक्रवर्ती अठारह हजार म्लेच्छ राजाओंको वशकर उनसे भेटमे रत्न ले खण्डकाप्रपात (काण्डकप्रपात) नामकी गुफाके पास आया ॥५०॥ वहाँ सेनाका पड़ाव डालकर चक्रवर्तीने अष्टोपवास किया। यह जानकर नाट्यमाल नामके देवने अलंकारका पिटारा, नागरूप दो मालाएँ तथा बिजली जैसी चमकवाले दो कुण्डल भेटकर "स्वामिन्! प्रसन्न होइये, आज्ञा दीजिये।" इस प्रकार कहकर स्थित हो गया। फिर विना युद्ध किये हुए ही वह चक्रवर्ती पूर्वकी ओर बढ़ा और वहाँकी गुफाके दरवाजेको खोला। इसमे प्रवेश और निर्गमन सिन्धु नदीके समान ही हुआ ॥५१-५३॥ उसने इस तरह गंगा नदीकी गुफाके दक्षिण दरवाजेसे निकलकर देव और मनुष्यो सहित सारे भारतवर्षको जीत लिया। साठ हजार वर्षोंके बाद वह अपनी राजधानीको आया पर फिर भी उसका सुदर्शन चक्र नगरमें प्रवेश नहीं करता था ॥५४-५५॥ तब उसने बुद्धिसागर नामके अपने पुरोहितसे पूछा कि यह हमारा चक्ररत्न नगरमें प्रवेश क्यों नहीं कर रहा है ॥५६॥ उसने कहा कि

प्रोवाच भ्रातरो येन न शृण्वन्ति विभोस्तव ।
तेन नेच्छति रत्नाग्रं प्रवेष्टुं त्वत्पुरीमिति ॥५७॥

तच्छ्रुत्वा प्रेषयामास तेभ्यो दूतान् सलेखकान् ।
दृष्ट्वा भव्यनृसिंहास्ते तन्निमित्तेन बोधिताः ॥५८॥

तत्यजुः स्वानि राज्यानि यानानि वसुसंयुताः ।
गत्वा भगवतः पार्श्वे श्रामण्यं प्रतिपेदिरे ॥५९॥

श्रुत्वा बाहुबली क्रुद्धो निर्ययौ पोदनादरम् ।
अक्षौहिण्यैकया सार्धं युयुत्सुर्युद्धशौण्डकः ॥६०॥

भृत्योऽहं न तवास्मीति प्रेष्यपूर्वं वचोऽपरान् ।
प्रत्यागच्छन्नरेन्द्रेन्द्रं गिरीन्द्रं करिराडिव ॥६१॥

असपर्ध्यं स्थितयोः साम्यं सरःसागरयोरिव ।
उभयोः सेनयोर्वीक्ष्य सम्मन्त्र्योभयमन्त्रिणः ॥६२॥

अस्तु वां धर्मसङ्ग्रामो मा कृपार्तां जनत्रयम् ।
इति विज्ञापितौ तौ तैर्धर्म्मयुद्धाय तस्थतुः ॥६३॥

विद्याधराऽग्रयत्नैश्च त्रिदशैः साप्सरोगणैः ।
आपूर्णमम्बरं क्षिप्रं धर्मयुद्ध दिदृक्षुभिः ॥६४॥

ततोऽनिमिषदृष्टिभ्यां चक्रतुः पुष्करेक्षणौ ।
तत्रादौ दृष्टिसङ्ग्रामं भग्नोऽभूद् भरतस्तदा ॥६५॥

पुनः सरसि बाहुभ्यां तरङ्गोद्गमसंकटम् ।
ऊर्मियुद्धमभूद् घोरम्परावृत्तोऽत्र राजराट् ॥६६॥

तृतीयं भूतले व्यक्तं पुनः सास्फोटवल्गितम् ।
गृहीतवञ्चितावेष्टं मल्लयुद्धमभूच्चिरम् ॥६७॥
अप्रमेयं महावीर्यं महाद्युतिपराक्रमम् ।
महोत्साहं महाधैर्य्यं दयमानः पितुः सुतम् ॥६८॥

आपके भाई आपकी आज्ञा नहीं मानते हैं इसलिए यह चक्ररत्न नगरीमे प्रवेश नहीं कर रहा है ॥५७॥ यह सुनकर उसने पत्र सहित दूतोको अपने भाइयोके पास भेजा। यह देख सिहके समान वलशाली आसन्न भव्य वे सव भाई उन पत्रोको पा विरक्त हो गये ॥५८॥ वैभवशाली उन लोगोने अपना राज्य, धन तथा सवारी वगैरह सव त्याग दिये और भगवान्‌के पास जाकर मुनिधर्म धारण कर लिया ॥५९॥

किन्तु यह सुनकर वाहुवली वहुत क्रुद्ध हुआ और अपने नगर पोदनपुरसे शीघ्र ही युद्ध-प्रवीण वह वीर एक अक्षौहिणी सेनाके साथ युद्ध करनेकी इच्छासे निकला ॥६०॥ "मैं तुम्हारा सेवक नहीं हूँ' यह सन्देश दूत-द्वारा भेजकर वह चक्रवर्तीकी ओर इस प्रकार चला मानो सुमेरु पर्वतकी ओर ऐरावत हाथी ही चल रहा हो ॥६१॥ तव प्रतिद्वन्द्विताके लिए आई हुई विशाल नदी और समुद्रके समान उन दोनोकी सेनाओको देखकर दोनो तरफके मंत्रियोंने विचारणा की ॥६२॥ और निवेदन किया कि 'आप दोनो-का ही धर्म-संग्राम हो, व्यर्थमे सेनाका नाश क्यो हो।" इस प्रकार उनके द्वारा निवेदन करनेपर दोनो धर्मयुद्ध करनेके लिए तैयार हो गये। विद्याधरोंके इन्द्र, यक्षगण और देवांगनाओ सहित देवगणो द्वारा युद्ध देखनेकी इच्छासे शीघ्र ही आकाश व्याप्त हो गया ॥६३–६४॥ कमल जैसे नेत्रवाले उन दोनो भाइयोने सर्वप्रथम निर्निमेष दृष्टिसे दृष्टिसंग्राम करना प्रारम्भ किया। किन्तु इस युद्धमें भरत पराजित हुआ ॥६५॥ फिर सरोवरमें हाथोसे वड़ी तरंगोंको उछालते हुए एक बड़ा घोर जलयुद्ध हुआ। इस युद्धमे भी भरत पराजित हो गया ॥६६॥ इसके बाद पृथ्वीपर ताल ठोक-ठोंककर व्यक्त होनेवाला तथा पकड़-छोड़वाला मल्लयुद्ध चिरकाल तक हुआ ॥६७॥ इसके बाद दयालु बाहुबली हाथीकी सूँड़के समान

शीघ्रं करिकराकारदोर्भ्यां बाहुबली नृपः ।
तस्या उद्धृत्य राजेन्द्रं सुरलोकमिवाद्रिराट् ॥६९॥ युग्मम् ।

निचिक्षेप शनैर्भूमौ विजयानन्ददुन्दुभिः ।
दध्वान निजसेनायां जयस्त्वांम्भोनिधिध्वनीन् ॥७०॥

अहो धैर्यमहो सत्त्वं साधुसाध्विति खे भुवि ।
सौनन्देयं प्रशंसद्भिरुत्कृष्टं नृसुरासुरै ॥७१॥

ततो निधिपति क्रुद्धश्चक्ररत्नमथाऽह्वयत् ।
आगच्छत्खे सहस्रारं तत्क्षणाद्यक्षरक्षितम् ॥७२॥

आज्ञप्तं तत्क्षणे गत्वा परीत्येनमशक्नुवन् ।
भेत्तुं बाहुबलीशान तद्दक्षिणभुजे स्थितम् ॥७३॥

दीप्यमानं ततश्चक्र दृष्ट्वाऽन्यमिव भास्करम् ।
कर्णावपिदधुः सर्वे भ्रातरं वीक्ष्य निष्कृपम् ॥७४॥

सुनन्दानन्दनो निन्दन्नैश्वर्यं धिग्धिगस्त्विति ।
भोगान् विहाय कैलाशे नैर्ग्रन्थ्यं प्रतिपेदिवान् ॥७५॥

व्युत्सृष्टाङ्गस्ततो योगी भूत्वा ध्यानपरायण ।
सन्तस्थे प्रतिमां वर्षं वल्लिवल्मीकवेष्टित ॥७६॥

घातिकर्मक्षयात्प्राप्तकेवलज्ञानराजताम् ।
कृतकृत्योऽपि भूत्वाऽसौ पारिषद्योऽभवद् विभोः ॥७७॥

एकच्छत्रमवाप्योर्वी प्रविश्य भरतः पुरम् ।
चक्रवर्त्यभिषेकं सत्सम्प्रापत्सुरपार्थिवै ॥७८॥

मजबूत वाहुओंसे एक पिताके पुत्र, महान् वलवाले, महाकान्ति और पराक्रमवाले, वड़े उत्साही और धैर्यवाले उस चक्रवर्तीको शीघ्र ही उठाकर खड़ा हो गया मानो सुमेरु पर्वत स्वर्गको लेकर ही खड़ा हो ॥६८-६९॥ फिर उसने चक्रवर्तीको धीरेसे जमीनपर रख दिया। उसी समय उसकी सेनामें जयवन्त होओ आदि समुद्र-के समान शब्द करती हुई विजयानन्द दुन्दुभि वजने लगी ॥७०॥ आकाश और पृथिवीपर देवों, असुरों और मनुष्योंने सुनन्दाके पुत्र वाहुबलीकी प्रशंसा करते हुए 'अहो धैर्य ! अहो पराक्रम ! वहुत ठीक ! वहुत ठीक' आदि शब्द कहे ॥७१॥ तव क्रुद्ध होकर चक्र-वर्तीने चक्ररत्नका स्मरण किया और वह हजार धारवाला, यक्षोंसे रक्षित उसी क्षण आकाशसे आ गया ॥७२॥ उसी समय आज्ञा पाकर वह चक्र वाहुबलिके पास गया और उस वाहुबली राजाको भेदन करनेमें असमर्थ होता हुआ उनकी प्रदक्षिणाकर उनके दाहिने हाथमें आकर स्थित हो गया ॥७३॥ एक ओर दूसरे सूर्यके समान चमकते हुए उस चक्रको देखकर तथा दूसरी ओर दयाशून्य उस भाईको देखकर सभीने अपनी आँख और कान बन्दकर लिये ॥७४॥

वाहुबलीने भी 'धिक्कार हो धिक्कार हो' इस प्रकार ऐश्वर्यकी निन्दा करते हुए भोगोंको छोड़कर, कैलाश पर्वतपर जिन-दीक्षा ले ली ॥७५॥ इसके वाद निश्चलांग और ध्यानमें लवलीन वे योगी वाहुबली, लताओं और वामियोंसे वेष्टित होकर प्रतिमा-योग धारणकर एक वर्ष तक खड़े तप करते रहे ॥७६॥ तथा घातिया कर्मोंके नष्ट हो जानेसे वे केवलज्ञानको प्राप्त हुए और कृतकृत्य होकर वे भगवान्के समवशरणमें शामिल हो गये ॥७७॥

इधर भरतने समस्त पृथिवीको अपने एकच्छत्र राज्यके अन्दर-पाकर नगरमें प्रवेश किया तथा देवता और राजाओंने चक्रवर्तीका

दत्त्वा कामं नरेन्द्रेभ्यो ह्युपकल्याणिकाधिकान् ।
प्रामोदं घोषयामास वर्षाणि द्वादशेप्सितम् ॥७९॥

दण्डच्छत्रे च रत्ने रथचरणमसिश्चायुधागारजानि
प्रोद्भूता श्रीगृहेऽन्तर्नवनिधि-मणयः काकिणी चर्मणी च ।
विद्याद्रक्चेणिजातौ तुरगकरिवरा उत्तरस्यां च योषित्
साकेतेऽभूत्पुरोधाः रथपतिगृहपती तस्य सेनापतिश्च ॥८०॥

इति श्री पुरुदेवचरिते पुराणसङ्ग्रहे दामनन्दिनः कृतौ
भरतविजयो नाम चतुर्थः सर्गः ॥४॥

अभिषेक किया ॥७८॥ इसके बाद भरतने कल्याणेच्छुक राजाओं-को मनवांच्छित दान देकर बारह वर्ष तक उत्सवकी घोषणा कर दी ॥७९॥ उस चक्रवर्तीके चौदह रत्नोंमे से दण्ड छत्र, चक्र और खड्गरत्न आयुधागारमे उत्पन्न हुए। कोषागारमें नवनिधियाँ, चूडामणिरत्न, कांकणी और चर्म रत्न उत्पन्न हुए तथा विद्याधरोकी उत्तर श्रेणीमें अश्वरत्न, हस्तिरत्न तथा स्त्रीरत्न हुए और अयोध्यामे पुरोहितरत्न, स्थपतिरत्न, गृहपतिरत्न तथा सेनापति-रत्न उत्पन्न हुए ॥८०॥

इस प्रकार दामनन्दि आचार्य द्वारा विरचित पुराण-सारसंग्रहके पुरुदेव चरितमें भरतका दिग्विजय नामका चौथा सर्ग समाप्त हुआ।

पञ्चमः सर्गः

जिनेन्द्रोऽपि हितं धर्मं प्रजाभ्यो देशयन्महीम् ।
तारयंश्च बहून्भव्यान् विजहार निरञ्जनः ॥१॥
आसंश्चतुशीतिश्च गणा गणभृतोऽपि च ।
तावन्त्येव सहस्राणि मुनीनां मोक्षकाङ्क्षिणाम् ॥२॥
आर्यिकाणां सहस्राणि त्रिंशद् दशगुणानि तु ।
तथोक्तानि तु पञ्चाशत्सहस्राण्यधिकानि च ॥३॥
श्रावकाणां सहस्राणि त्रिंशद् दशगुणानि तु ।
श्राविकाणां प्रमाण तु सहस्रै. शतपञ्चकै. ॥४॥
ययु. पूर्वसहस्राणि शताभ्यस्तानि विंशति ।
कौमारेऽतस्त्रय षष्टिः राज्यस्यैकं च संयमे ॥५॥
उक्तञ्च—
सप्ततिलक्षा कोटि· षट्पञ्चाशत्सहस्रसंयुक्ता ।
पूर्वस्य तु प्रमाण बोद्धव्या वर्षकोटीनाम् ॥६॥
॥७०५६००००००००००॥
नक्षत्र चोत्तराषाढं माङ्गल्येषु च सप्तसु ।
निर्वाणमभिजिद्योगे पुरुदेवस्य पूज्यते ॥७॥
उक्तञ्च—
स्वर्गावतरण जन्म विवाहराज्याभिषेकनि.क्रमणम् ।
केवलबोधो निर्वाणं सप्त च मङ्गलानि पुरोः ॥८॥
अथाऽन्तेऽष्टापद शैलं देवेन्द्रैर्बहुशोऽर्चितः ।
चतुर्विधेन संघेन सहारुह्य जिनेश्वर. ॥९॥
सहस्रैर्दशभिः सार्द्धमृषिभि· सन्निविष्टवान् ।
चतुर्दशदिनादूर्ध्वं प्राप्य स्थानं चतुर्दशम् ॥१०॥
पूर्वाह्ने शेषकर्मान्तं कृत्वा लोकं प्रकम्पयन् ।
अव्याबाध सुखं क्षेमं सम्प्रापत्परम पदम् ॥११॥
तत सदेविका इन्द्रा आगम्य चतुरष्टकाः ।
शरीरमहिमां तस्य महर्घ्यां चक्रुरन्तिमाम् ॥१२॥

पंचम सर्ग

कर्ममलरहित जिनेन्द्र आदिनाथ भगवान् भी प्रजाके लिए हितकारी धर्मका उपदेश करते हुए तथा बहुतसे भव्योंको तारते हुए पृथिवीमे विहार करने लगे ॥१॥ उनके समवशरणमे ८४ गण थे तथा चौरासी ही गणधर थे और उतने ही हजार मोक्ष चाहनेवाले मुनि थे। आर्यिका भी तीन लाख पचास हजार थीं। और श्रावक तीन लाख प्रमाण थे। श्राविकाओंकी संख्या पाँच-लाख थी। भगवान्का बीस लाख पूर्व वर्ष कुमार कालमें, तिरेसठ लाख पूर्व वर्ष राज्य-कालमे तथा एक लाख पूर्व वर्ष संयम कालमे बीता ॥२-५॥ कहा भी है—सत्तर लाख छप्पन हजार कोड़ाकोडि वर्ष प्रमाण पूर्व होता है ॥६॥ उत्तराषाढ़ नक्षत्रमे तथा अभिजित् योगमे सात मांगल्य युक्त भगवान्के निर्वाण पदकी पूजा की गई ॥७॥ कहा भी है—(१) स्वर्गावतरण (२) जन्म कल्याणक (३) विवाह (४) राज्याभिषेक (५) तपकल्याणक (६) केवलज्ञान कल्याणक और (७) निर्वाण कल्याणक ये सात भगवान् ऋषभदेवके माङ्गल्य हैं ॥८॥ देवेन्द्रोंके द्वारा नाना प्रकारसे पूजित वे भगवान् चार प्रकारके संघ सहित कैलास पर्वतपर आरूढ हुए ॥९॥ वहाँ दश हजार साधुओंके साथ उन्होंने समाधि लगाई। तथा चौदह दिनोंके बाद चौदहवे गुणस्थानको प्राप्त हुए ॥१०॥ उन्होंने प्रातःकाल ही शेष कर्मोंका अन्तकर लोकको कंपाते हुए, अव्याबाध सुखवाले कल्याणकारी मोक्षपदको पाया ॥११॥ तब अपनी देवियों सहित बत्तीस इन्द्रोंने परिवार सहित आकर बड़े ठाट-बाटसे भगवान्का निर्वाण-कल्याणक किया ॥१२॥

उक्तञ्च—

दशभवनेन्द्रा द्वादश कल्पेन्द्रा व्यन्तराऽमरेन्द्रास्त्वष्टौ ।
ज्योतिष्केन्द्रौ द्वाविति द्वात्रिंशत्सम्मिता इन्द्राः ॥१३॥

राजराजोऽपि तज्ज्ञात्वा स्वप्नैरुक्त पुरोधसा ।
ससैन्यस्तूर्णमागत्य जिनदेहमपूजयत् ॥१४॥

ततोऽग्नीन्द्रकिरीटस्थचूडामणिजवह्निना ।
दग्ध्वा निर्वाप्य तद्देह गन्धाम्बुकुसुमाक्षतैः ॥१५॥

गणेशामार्षभाणाञ्च चितां संस्कृत्य दक्षिणे ।
शेषाणां वामके पार्श्वे त्रीनप्यग्नीन् समर्चयत् ॥१६॥

अथेन्द्रा नृपतीन्द्राय कृत्वा हस्तप्रसारणम् ।
आश्वास्याभाष्य मधुरं गणेशस्तं समर्पयन् ॥१७॥

ततो वृषभसेनस्त विलपन्त वियोगत' ।
अनुशास्ति स्म राजेन्द्रमितिहासमिमं ब्रुवन् ॥१८॥

अस्माकमर्हतश्चापि सम्बन्धं शृणु राजराट् ।
चित्रससारकान्तारे भवादारभ्यमात्मवान् ॥१९॥

यदासीद् वज्रजङ्घोऽयं भगवानष्टमे भवे ।
तदा मतिवरो मन्त्री तस्याभूत्त्व हिते रतः ॥२०॥

सैन्येशोऽकम्पनो यश्च सोऽय वाहुवली नृपः ।
स्वसा याऽनुन्दरी तस्य सेयं ब्राह्मी तव स्वसा ॥२१॥

योऽभूदानन्दपुरोधा स इह सुन्दरसुन्दरी ।
पुत्रा ये वीरवाह्वाद्या श्रीमत्यास्ते वयं नृपेट् ॥२२॥

वयं कृत्वा तप सम्यगाराधितचतुष्टयाः ।
आधग्रैवेयके सर्वे चाहमिन्द्रा वभूविम ॥२३॥

भगवान् वज्रनाभाख्यस्तृतीये तु भवे यदा ।
तदा यूयमभूताऽस्य पीठाद्या भ्रातरः प्रियाः ॥२४॥

कहा भी है—भवनवासी देवोंके दस इन्द्र, कल्पवासी देवोंके बारह इन्द्र, व्यन्तर देवोंके आठ इन्द्र तथा ज्योतिषियोंके दो इन्द्र, इस प्रकार मिलकर बत्तीस इन्द्र होते हैं ॥१३॥

चक्रवर्तीको अपने पुरोहित द्वारा स्वप्नके फलस्वरूप भगवान्‌के निर्वाणकी सूचना मिली जिससे सैन्यसहित शीघ्र आकर उन्होंने निर्वाण-कल्याणककी पूजा की ॥१४॥ तब अग्निकुमार देवोंके इन्द्रके मुकुटमें लगे हुए चूणामणि रत्नकी अग्निसे, सुगन्धित जल, पुष्प और अक्षतोंसे सिञ्चित उनकी देहका दाह संस्कार किया ॥१५॥ ऋषभसेन आदि गणधरोंकी अग्निको दक्षिण भागमे तथा अन्य मुनियोंकी अग्निको वाम भागमे स्थापित कर गार्हपत्य, दक्षिणाग्नि तथा आह्वनीय अग्निकी उन लोगोंने पूजा की ॥ १६ ॥ इसके बाद इन्द्रोंने चक्रवर्ती भरतको हाथ फैलाकर आश्वासन दिया तथा मधुरालापकर गणधरोंको उन्हें सौंप दिया ॥१७॥ तब वृषभसेन गणधरने वियोगसे विलाप करते हुए उस चक्रवर्तीको समझाया और सब लोगोंका पूर्व वृत्तान्त कहा ॥१८॥

हे चक्रवर्ती, हम सबका और भगवान् आदिनाथका सम्बन्ध सुनो। जो इस विचित्र संसार रूपी जंगलमें अनेक भवोंमे घूमते हुए प्राप्त हुआ ॥१९॥ जब आठ भव पहले भगवान् वज्रजघ थे तब तुम उनके हितकारो मतिवर नामके मत्री थे। जो उनका अकम्पन नामका मत्री था वह बाहुबली राजा हुआ और उसकी जो अनुन्दरी नामकी वहिन थी वह तुम्हारी ब्राह्मी नामकी बहिन हुई है ॥२०-२१॥ जो आनन्द नामका पुरोहित था वह सुन्दरी नामकी बहिन हुई है और श्रीमतीके जो वीरबाहु आदि पुत्र थे वे सब हम लोग हुए हैं ॥२२॥ हम लोगोंने तपकर तथा चार आराधनाओंका आराधनकर आद्य ग्रैवेयकमे अहमिन्द्र पद पाया था ॥२३॥ जब तीसरे भवमे भगवान् वज्रनाभ

अवतीर्य ततोऽभूम वय तस्यैव सूनव ।
प्रव्रज्य वज्रनाभेन सहाऽकुर्म तपो महत् ॥२५॥

आराध्य श्रीप्रभे शैले वय सर्वार्थमापिम ।
अभवामावतीर्येह पुरुदेवस्य पुत्रकाः ॥२६॥

रत्नगृहपतिर्योऽभूत्सोऽयं श्रेयान् कुरूत्तमः ।
येन धर्मरथस्येह द्वितीयं चक्रमुद्धृतम् ॥२७॥

एष सम्बन्धको भद्र मास्म शोकं कृथा वृथा ।
गन्तुं त्वरस्व तन्मूलमयं तस्य महास्पद. ॥२८॥

गणेन्द्रोक्तं निशम्येन्द्रा नृपेन्द्रश्च सविस्मया' ।
कृत्वा प्रदक्षिणं शैलं जग्मु. स्वं स्वं निकेतनम् ॥२९॥

स श्रावकान् समाहूय धृत्वा वृत्तिमपूजयत् ।
संज्ञामत तदालम्ब्य सूत्रं कण्ठेषु राजराट् ॥३०॥

तनुवातयुते लोके सर्वज्ञे सिद्धिमीयुषि ।
ईजुस्तदाऽग्निहोत्रं च लोकेऽद्यापि प्रवर्तते ॥३१॥

प्रणमन् साधुसङ्घञ्च धर्मं शृण्वन् सदोत्थितः ।
श्रावकांश्च सदा वृत्त्या पूजयन् भुवि सन्ततम् ॥३२॥

कृत्स्नं भारतं वास्यं पालयन् भरतः प्रभु. ।
अर्हद्भक्तः सुधर्मज्ञो दिव्यान् भोगान् प्रभुक्तवान् ॥३३॥

अन्यदा जातनिर्वेदो भरत सहसात्यजन् ।
राजराजश्रियं धीर सबलामबलामिव ॥३४॥

दत्त्वार्ककीर्तये राज्यं मुक्तियोग्यानुभावन ।
लोचनोन्मेषकालेन कैवल्यमुदपादयत ॥३५॥

नामके चक्रवर्ती हुए थे तब तुम लोग उनके पीठ आदि प्रिय भाई हुए थे ॥२४॥ ग्रैवेयकसे अवतीर्ण होकर हम लोग उनके ही पुत्र हुए। तथा वज्रनाभके साथ ही दीक्षा लेकर हम लोगोंने घोर तप किया ॥२५॥ फिर श्रीप्रभ शैलपर तपस्याकर हम सबने सर्वार्थ-सिद्धि प्राप्त की थी और वहाँसे अवतीर्ण होकर यहाँ आदिनाथ भगवान्के पुत्र हुए ॥२६॥

जो गृहपतिरत्न था वह यहाँ आकर कुरुवंशमे श्रेष्ठ श्रेयांस राजा हुआ जिसने धर्मरथके दूसरे चक्रको चलाया, अर्थात् दान-धर्मका प्रवर्तन किया ॥२७॥ इस संबंधको जानकर हे भद्र ! व्यर्थमे तुम शोक मत करो। उसके मूल मोहका त्याग करो क्योंकि यह शोकका महान् स्थान है ॥२८॥

इस प्रकार गणधरके द्वारा दिये गये उपदेशको सुनकर आश्चर्य-युक्त हो इन्द्रोंने तथा चक्रवर्तीने कैलाश पर्वतकी प्रदक्षिणा की तथा अपने-अपने स्थानको गये ॥२९॥ तब चक्रवर्तीने देशव्रत धारणकर कण्ठमे सूत्र (जनेऊ) धारी श्रावकोंकी, जो कि संयम धारण किये हुए थे, पूजा की ॥३०॥ सर्वज्ञ भगवान् आदिनाथके मोक्ष चले जानेपर वे लोग अग्निहोत्र (यज्ञ) को पूजने लगे, जो पद्धति आज भी लोकमें चल रही है ॥३१॥ वह चक्रवर्ती, सदा सावधान हो साधु-संघकी पूजा तथा धर्म-श्रवण करता हुआ तथा निरन्तर दान-सन्मान द्वारा श्रावकोंकी पूजा करता हुआ रहने लगा ॥३२॥ तथा यह ऐश्वर्यशाली राजा सम्पूर्ण भारतवर्षका पालन करता हुआ, अर्हन्त-भक्तिका आचरण करता हुआ और सुधर्मको जानता हुआ, दिव्य भोगोंको भोगने लगा ॥३३॥

किसी समय भरतको सहसा वैराग्य हो गया इसलिए उस धीर-वीरने स्त्रीके समान चक्रवर्तीकी उस चञ्चल विभूतिको त्याग दिया ॥३४॥ वह अर्ककीर्ति नामके अपने पुत्रको राज्य सौंपकर

अगु' शतसहस्राणि पूर्वाणां सप्तसप्ततिः ।
कौमारे षट् च साम्राज्ये तस्यैकं च सुसंयमे ॥३६॥
अन्ते वृषभसेनाद्यैरारुह्याष्टापदं सह ।
कृत्स्नकर्मक्षयात्प्रापन्मोक्षमक्षयमक्षरम् ॥३७॥
नृपास्त्रैलोक्यसारैक्यमुकुटस्पृष्टमस्तकाः ।
भरताद्याः स्वपुत्रेभ्यो दत्वा दत्वा नरेशताम् ॥३८॥
चतुर्दशसहस्रास्तु शताभ्यस्ता निरन्तराः ।
जग्मुः मोक्षमवापुश्चैके स्वर्गाऽग्रेऽहमिन्द्रताम् ॥३९॥
एवं दशगुणांश्चाष्टौ परिपाल्य पुनः पुनः ।
सम्प्रापुरक्षर मध्य एकैकोऽभूत्सुरेश्वरः ॥४०॥
कृत्वा कृत्वा तपः सम्यगुत्पाद्योत्पाद्य केवलम् ।
ततश्चित्रान्तरं जग्मुर्मोक्षमिक्ष्वाकुकेतवः ॥४१॥
नरनारीगणाः सर्वे ये साकेतपुरोद्भवाः ।
त्रिसप्तपरिवारास्ते जग्मुर्मोक्षं ततो दिवम् ॥४२॥
सागरोपमकोट्यस्तु शताभ्यस्ताः सहस्रिका. ।
पञ्चाशदादितीर्थस्य कालसन्ततिरिष्यते ॥४३॥
एवमादिकरस्तीर्थं प्रवर्त्य परमेश्वर ।
मार्गेणाशु गतिं भव्यानसंख्येयानजीगमत् ॥४४॥
तमगण्यगुणं पुण्यमनन्तं ज्ञानदर्शनम् ।
शिरसा काश्यपं वन्दे इक्ष्वाकुं मोक्षकाङ्क्षया ॥४५॥
उक्तञ्च—
आत्मन पितृसन्तानादागतं विबुधै कुलम् ।
सम्बन्धश्च स्वकीयाया. जनन्या गोत्रमुच्यते ॥४६॥
चरितं पुरुदेवस्य सदादशभवाश्रितम् ।
गण्यं गुण्य च भण्य च शुचिभिः प्रयतात्मभि' ॥४७॥
योऽध्येताऽध्यापकश्चास्य श्रोता श्रावयिता च य ।
ते मुक्तोभयपाप्मानो यास्यन्ति परमां गतिम् ॥४८॥

मुक्तिके लिए योग्य भावनाओंका ध्यान करता हुआ एक निमेप मात्रमे केवलज्ञानी हो गया ॥ ३५ ॥ उस चक्रवर्तीके सतहत्तर लाख पूर्व वर्ष कुमारावस्थामे, छह लाख पूर्व वर्ष साम्राज्यावस्थामे और एक लाख पूर्व वर्ष संयममे बीते ॥३६॥ तथा अन्तमे उसने वृषभ-सेनादि गणधरोंके साथ कैलाश पर्वतपर आरूढ़ होकर और सम्पूर्ण कर्मोको क्षयकर कभी नाश न होनेवाले अव्यय मोक्ष पदको प्राप्त किया ॥३७॥ जिनेन्द्र भगवान्‌के चरण-कमलोंमे मुकुट झुकानेवाले भरतादि राजाओने अपने-अपने पुत्रोको राज्य दे और दीक्षा ले उनमेंसे चौदह लाख तो मोक्ष गये तथा कुछ नवग्रैवेयक आदिमें अहमिन्द्र हुए ॥३८–३९॥ इस प्रकार अठारह गुणोंका वार-वार पालन करते हुए कुछ तो मोक्ष गये और कुछ मध्यग्रैवेयकमे इन्द्र हुए ॥४०॥ इक्ष्वाकु-कुल-तिलक कुछ राजा तप कर केवल-ज्ञानकी प्राप्ति कर मोक्ष गये ॥४१॥ साकेत (अयोध्या) मे उत्पन्न सभी जो २१ परिवारवाले नरनारीगण थे—वे सब मोक्ष गये और शेप स्वर्ग गये ॥४२॥

भगवान् ऋषभनाथका तीर्थ-प्रवर्तन काल एक पूर्वांग अधिक पचास लाख करोड़ सागरोपम प्रमाण कहा गया है ॥४३॥ इस प्रकार भगवान् आदिनाथ तीर्थंकरने अपने तीर्थको चलाया और इस मार्गसे असंख्येय भक्तोंको मोक्ष भेजा ॥४४॥ उस अगण्य गुणवाले पुण्यस्वरूप, अनन्त ज्ञान-दर्शनवाले इक्ष्वाकु कुलोत्पन्न काश्यप भगवान्‌को मोक्षकी इच्छासे शिर नमाकर प्रणाम करता हूँ ॥ ४५ ॥ कुल और गोत्रका अन्तर इस प्रकार है:—अपने पितृ क्रमसे आई हुई परम्पराको कुल कहते हैं । तथा अपनी स्वमाताके सम्बन्धसे आये हुए क्रमको गोत्र कहते हैं ॥ ४६ ॥

पवित्र यतिजनों द्वारा सदा माननीय, गुणनीय तथा कथनीय आदिनाथ भगवान्‌के इस चरितको जो पढ़ते हैं, पढ़ाते हैं, सुनते हैं

यथात्र ललितं किञ्चिन्नामाव[illegible] ।
[illegible] चरित्रं [illegible] ॥४९॥

इति [illegible] ।
[illegible] ॥५०॥

इति महापुराणे पुरुदेवचरिते पुराणसारसंग्रहे भगवन्निर्वाणगमनो नाम पञ्चमः सर्गः समाप्तः ॥५॥

उक्तं च—

आर्षं बहुविधाख्यानं देवर्षिचरिताश्रितम् ।
इतिहासमिति प्रोक्तं मुनिभिर्वीरनायके ॥१॥

पञ्चसर्गविभक्तार्थो नानार्थाख्यानसंयुतः ।
शतान्यर्द्धचतुर्थानि श्लोकानामेष संग्रहः ॥२॥

क्षेत्रं द्रव्याणि लोकश्च कालोत्पत्तिर्युगानि च ।
तथा कुलकरो वंशः पुराणं सप्तलक्षणम् ॥३॥

येन कृत्स्नं जगद् दृष्टं ज्ञानं च गुरुपर्ययैः ।
योऽक्षयो योऽजयोऽनन्तस्तस्मै सर्वविदे नमः ॥४॥

आद्यो महाबलो ज्ञेयो ललिताङ्गस्ततोऽपरः ।
वज्रजंघस्तथाऽऽर्यश्च श्रीधरः सुविधिस्तथा ॥५॥

अच्युतो वज्रनाभोऽहमिन्द्रश्च वृषभस्तथा ।
दशैतानि पुराणानि पुरुदेवाऽऽश्रितानि वै ॥६॥

और सुनाते है वे भय और पापसे मुक्त हो उत्तम गतिको जाते हैं ॥ ४७–४८ ॥ यहाँपर नामावलि आदिके लिखनेमे जो कुछ गलती हो गई हो उसे अर्हद्भक्ति समझकर ही पुराण-शास्त्रके विद्वानोंको क्षमा करना चाहिये ॥४६॥

इस प्रकार ऋषभ भगवान्में अधिक भक्ति सम्पन्न बुद्धिवाले श्री विनयनन्दि आचार्यके शिष्य दामनन्दीने भव्योंके हितके लिए दशभवोंको लेकर चरित्र वर्णन किया ॥५०॥

इस प्रकार पुराणसारसंग्रहके पुरुदेव चरितमें भगवान्का निर्वाणगमन नामक पाँचवाँ सर्ग समाप्त हुआ ।

कहा है—

आर्ष नाना प्रकारकी कथाओंसे युक्त देव और मुनियोंके चरितका वर्णन करनेवाला इतिहास है ऐसा वीर शासनमे रहनेवाले मुनियोने कहा है ॥१॥ पाँच सर्गोंमे विभक्त, नाना अर्थ और कहानियोंसे युक्त ३५० श्लोको प्रमाण यह संग्रह है ॥२॥ क्षेत्र, द्रव्य, लोक, कालोत्पत्ति, युग, कुलकर और वंशका वर्णन जिसमे हो इस प्रकार सात लक्षणवाला पुराण होता है ॥३॥

जिसने गुण-पर्यायो सहित समस्त जगत्को देखा है और जाना है उस अक्षय, अजेय और अनन्त सर्वज्ञके लिए प्रणाम है ॥४॥

सर्व प्रथम महाबल, दूसरा ललितांग, तीसरा वज्रजंघ, चौथा भोगभूमियां आर्य, फिर श्रीधरदेव, इसके बाद सुविधिकुमार, सातवाँ अच्युतेन्द्र, आठवाँ वज्रनाभ, नवम अहमिन्द्र तथा दशवाँ ऋषभ ये दशभव पुरुदेव आदिनाथके हैं ॥५–६॥

चन्द्रप्रभचरित्रम्

स्वधामकल्पनातीतज्ञानातिशयसम्पदम् ।
स्तोष्ये चन्द्रप्रभं भक्त्या वरद नाममालया ॥१॥

पुष्करार्द्धस्य पूर्वस्यां मन्दरादपरे परे ।
विदेहे गन्धिले देशे बभूव श्रीपुरं पुरम् ॥२॥

दैवपौरुषधाम्नोऽत्र श्रीषेणस्य महीभुज ।
प्रियाऽऽसीदपरेव श्री· श्रीमती तनयार्थिनी ॥३॥

साऽर्हतामन्यदा भक्त्या पूजां कृत्वा शुभे दिने ।
शय्योत्सङ्गे सुख सुप्ता प्रोषधम्लानविग्रहा ॥४॥

व्यलोकत रजन्यन्ते कमलायतलोचना ।
स्वप्नान् केशरिनागेन्द्रनिशाकररविश्रिय· ॥५॥

अथ तस्यां सुतो जज्ञे श्रीवर्मा गुणवत्तम· ।
रमणीय इवानल्पो विभव पुण्यसम्पदि ॥६॥

ववृधे जनचेतांसि निजैरानन्दयन् गुणै ।
कुमुदानीव विमलः सकलो मृगलाञ्छन. ॥७॥

श्रीकान्ता तस्य जायाऽऽसीन्मनोनयनहारिणी ।
व्यराजत तयातीव लतया कल्पवृक्षवत् ॥८॥

बभूव श्रीधर सूनुस्तयोरुत्तमपुण्ययो ।
मूर्त्तिमत्तामिवोपेतश्चिरकालमनोरथः ॥९॥

आययौ श्रीधरस्तत्र जिनो भूत्यै शरीरिणाम् ।
तीव्रघर्मपरीतानां सवारिरिव वारिद ॥१०॥

श्री चन्द्रप्रभ-चरित

अपने स्वरूपमें स्थित कल्पनातीत अनन्त ज्ञानादि अतिशय सम्पत्तिवाले तथा मनोरथदायक चन्द्रप्रभ भगवान्‌को भक्तिपूर्वक मैं उनकी नामावली गाकर स्तुति करता हूँ ॥१॥

पुष्करार्ध द्वीपके पूर्व मेरुकी पश्चिम दिशामें पूर्व विदेहके गन्धिल देशमें श्रीपुर नामका नगर था ॥२॥ दैव तथा पुरुषार्थसे प्राप्त शोभासम्पन्न वहाँके राजा श्रीषेणकी दूसरी लक्ष्मीके समान श्रीमती नामकी रानी थी। उसे पुत्र-प्राप्तिकी तीव्र अभिलाषा थी ॥३॥ एक समय शुभ दिनमें अर्हन्त भगवान्‌की भक्तिपूर्वक पूजाकर, उपवाससे म्लान शरीरवाली वह रानी सुखपूर्वक शय्यामें सोयी थी ॥४॥ रात्रिके अन्तिम भागमें कमलके समान विशाल नेत्रवाली उस रानीने स्वप्नमें सिंह, ऐरावत हाथी, चन्द्रमा, सूर्य तथा लक्ष्मी देखे ॥५॥ अनन्तर उसे श्रीवर्मा नामका एक गुणवान् पुत्र उत्पन्न हुआ। मानो पुण्य सम्पत्तिसे रमणीय महान् सम्पत्ति ही प्राप्त हुई है ॥६॥ जिस प्रकार निर्मल पूर्ण चन्द्र कुमुद-पुष्पोंको विकसित करता है उसी तरह निजगुणोंसे मनुष्योंके चित्तको प्रसन्न करता हुआ वह वृद्धिको प्राप्त होने लगा ॥७॥ मन और नेत्रोंको प्रसन्न करनेवाली उसके श्रीकान्ता नामकी रानी थी। उससे वह ऐसा सुशोभित होता था जैसे लतासे कल्पवृक्ष सुशोभित होता है ॥८॥ पूर्व पुण्योदयसे उन दोनोंको श्रीधर नामका पुत्र हुआ। मानो चिरकालके मनोरथ मूर्तिमान रूप धारणकर ही आये हों ॥९॥ वहाँ पर प्राणिवर्गके कल्याणके लिए श्रीधर नामके मुनिवर आये। मानो तेज धूपसे पीड़ित लोगोंके लिए जलयुक्त

श्रुत्वा प्रियंकरोद्याने तमासीनं महीपति ।
ययौ सेनावृतस्तूर्णमाकृष्ट इव तद्गुणैः ॥११॥

विधिवत्स तमभ्यर्च्य श्रुत्वा धर्मं विमोक्षधीः ।
ददौ श्रीवर्मणे राज्यं प्रीतो रत्नमिवाऽतुलम् ॥१२॥

शतैः पञ्चभिरुर्वीशां राजा साकमसङ्गिनीम् ।
दीक्षामुपाददे लक्ष्मीं दैवपौरुषवानिव ॥१३॥

अवाप्य राज्यसम्यक्त्वे सकान्ताभिरमा बहून् ।
भोगाननुबभूवोऽयानप्सरोभिरिवामर. ॥१४॥

आसीनस्ताभिराषाढपौर्णमास्यां निशामुखे ।
सौधोत्सङ्गे स्वपत्नीभिः कैलास इव वासवः ॥१५॥

ज्योत्स्नांशुकां चन्द्रादर्शां ताराभूषां निशावधूम् ।
शुभामालोकयन् रेमे भूषयन्तीं वधूमिव ॥१६॥

तत्पार्श्वे शीर्यमाणाङ्गी पपातोल्का विहायस' ।
भावानां ज्ञापयन्तीव स्थेयसीमव्यवस्थितिम् ॥१७॥

तामालोक्य भुवो नाथ. कान्ताजनपरिग्रह ।
नश्वरी भोगसम्पत्तिरुल्केवेति व्यरज्यत ॥१८॥

निधाय श्रीधरे राज्यश्रिय राजा गरीयसीम् ।
दिदीक्षे श्रीधरोपान्ते महीशां सप्तभि शतै. ॥१९॥

चिरकालं तपो जैत्र कृत्वान्ते श्रीप्रभे गिरौ ।
अशनं मासमुत्सृज्य श्रीप्रभे श्रीधरोऽभवत् ॥२०॥

मेघ ही आ गया हो ॥१०॥ राजा उनका प्रियंकर उद्यानमें आगमन सुन उनके गुणोंसे खींचे हुएके समान ही शीघ्र सेना सहित उनकी वन्दनाके लिए गया ॥११॥ उसने विधिपूर्वक उनकी पूजा की। उनसे धर्म श्रवणकर मोक्षकी अभिलाषासे उस राजाने प्रसन्न होकर श्रीवर्माको मूल्यवान रत्नके समान राज्य सौंप दिया ॥१२॥

पाँच सौ राजाओंके साथ उस राजाने इस प्रकार निर्ग्रन्थ दीक्षा ले ली। मानो दैव और पुरुषार्थ युक्त पुरुष लक्ष्मीको प्राप्त करता है ॥१३॥ राज्य और सम्यक्त्व दोनोंको पाकर श्रीवर्माने, देवियोंके साथ देवताओंके समान, अपनी रानियोंके साथ बहुतसे भोगोंको भोगा ॥१४॥

एक समय आषाढ़की पूर्णमासीके दिन सायंकाल वह अपनी रानियोंके साथ महलकी छतपर बैठा था जैसे इन्द्र कैलाश पर्वतपर बैठा हो ॥१५॥ इस प्रकार चन्द्रिका रूपी श्वेत वस्त्रसे सुशोभित, चन्द्रमा रूपी दर्पणसे युक्त हो, तारा गण रूपी भूषणोंको सजाती हुई शुभगुणसम्पन्न निशावधूको शृङ्गार करती हुई वधूके समान देखकर वह रमण करने लगा ॥१६॥ उसी समय उसके पास ही आकाशसे क्षीण प्रकाशवाला उल्कापात हुआ। मानो वह यह बतला रहा हो कि पदार्थोंकी स्थिरता अनिश्चित है ॥१७॥ कान्ता, सेवक एवं परिग्रह आदिसे युक्त राजाने उस उल्कापातको देखकर यह विचार किया कि यह भोग-सम्पत्ति उल्काकी भाँति ही क्षणभङ्गुर है और वे विरागको प्राप्त हो गये ॥१८॥ राज्यके विशाल वैभवको अपने श्रीधर नामके पुत्रको देकर सात सौ राजाओंके साथ उस राजाने श्रीधर मुनिराजके पास दीक्षा ले ली ॥१९॥ फिर बहुत समय तक, कर्मोंको क्षय करनेवाले तपको करके अन्तमें श्रीप्रभ नामके पर्वतपर आरूढ़ हो उसने एक

द्विपयोनिधितुल्यायुस्तत्र भूत्वा सुरेश्वर ।
उपभुज्य सुखं प्राज्यं ततो नाकादवातरत् ॥२१॥

दक्षिणे धातकीखण्डे पूर्वमन्दर भूभृत ।
भारते पुर्य्ययोध्यायां विषयेऽलकनामनि ॥२२॥

अजितञ्जयभूमीश· श्रीदत्तायामजायत ।
तनयोऽजितसेनाख्यो विधेर्नित्यादुदर्कवत् ॥२३॥ युग्मम्॥

स्वराज्यं सूनवे दत्वाऽमितप्रभजिनान्तिके ।
दीक्षित्वा तपसा ज्ञानमवाप्य ज्योतिरक्षरम् ॥२४॥

जयदाऽजितसेनस्य जायाऽसीदतिसुन्दरी ।
जितशत्रु सुतो यस्यां जातोऽरण्यामिवानल· ॥२५॥

अरिन्दमाय तद्दानं चारणायान्यदा ददौ ।
अलब्ध वसुधारादि येन पूजां दिवौकसाम् ॥२६॥

चक्रचिह्नं स साम्राज्यमवाप्य गतविग्रहः ।
बुभुजे देवसम्पत्ति देवविद्याधराहृताम् ॥२७॥

अभिषिच्य सुतं श्लाघ्य जितशत्रुं नृपेश्वरः ।
साम्राज्यं विजहौ धीमान् कुशाग्रस्थमिवाऽमृतम् ॥२८॥

प्रव्रज्य स्वगुरूपान्ते तपस्कृत्वा गतस्पृह· ।
द्वाविंशतिसमुद्रायु प्रतोन्द्रोऽभवदच्युते ॥२९॥

जग्राहानुत्तमं तेजो भुक्त्वा सुखमयीं सुधाम् ।
ततोऽच्यवत स क्षीणस्वसंस्कारफलोदयः ॥३०॥

मासका उपवास धारण किया और देह त्याग कर श्रीप्रभ विमानमें श्रीधर नामका देव हुआ ॥ २० ॥ वहाँ उस देवकी दो सागर प्रमाणकी आयु थी तथा वह वहुत सुखोंको भोगकर स्वर्गसे च्युत हुआ ॥ २१ ॥

धातकी खण्डद्वीपके पूर्व सुमेरुकी दक्षिण दिशामें भरत क्षेत्रके अलका नामके देशमे अयोध्या नामकी नगरी है ॥ २२ ॥ वहाँके राजा अजितंजय और रानी श्रीदत्तासे वह स्वर्गसे च्युत देव अजितसेन नामका पुत्र हुआ मानो वह उनके किये हुए नित्यकर्मोंका फल ही हो ॥२३॥ फिर उस राजाने अपने पुत्रको राज्य देकर अमितप्रभ जिनेन्द्रके समीप दीक्षा ले ली और तप-वलसे केवलज्ञान प्राप्त कर निर्वाण पद पाया ॥ २४ ॥

अजितसेनकी जयदा नामकी अत्यन्त सुन्दर पत्नी थी। उससे जितशत्रु नामका पुत्र उत्पन्न हुआ। जिस प्रकार अरणीसे अग्नि उत्पन्न होती है ॥ २५ ॥ उस अजितसेनने एक समय अरिन्दम नामके चारण मुनिराजको दान दिया। इससे रत्नोकी वृष्टि कर देवताओने उसकी पूजा की ॥ २६ ॥ फिर उस अजितसेनको चक्ररत्नकी प्राप्ति हुई। जिससे युद्ध-द्वारा दिग्विजय करते हुए उसने साम्राज्य प्राप्त कर देव और विद्याधरोसे दी गई देव-सम्पत्तिको चिरकाल तक भोगा ॥ २७ ॥ इसके वाद उस बुद्धिमान् चक्रवर्तीने अपने योग्य पुत्र जितशत्रुको राज्यपद पर अभिषेक कर कुशतृणके अग्रभाग पर स्थित अमृतकी भाँति साम्राज्यको छोड़ दिया ॥ २८ ॥ वह अपने गुरुके समीप दीक्षा लेकर रागद्वेषसे रहित हो तप करने लगा तथा शरीर त्याग कर अच्युत स्वर्गमे बाईस सागरकी आयुवाला प्रतीन्द्र हुआ ॥ २९ ॥ वहाँ पर प्रखर प्रतापवाला वह प्रतीन्द्र आनन्दामृतका पान कर आयु समाप्त होने पर वहाँसे च्युत हुआ ॥ ३० ॥

पूर्वेण धातकीखण्डपूर्वमन्दरभूधृतः ।
विदेहे स्वस्तिकावत्यां नगरे रत्नसंचये ॥ ३१ ॥
देव्यां कनकमालायां कनकाभादजायत ।
पद्मनाभः सुतः कान्तो वसन्त इव सम्मतः ॥ ३२ ॥
कमनीयेन्दुलेखेव तस्य सोमप्रभा प्रिया ।
आसीत्सुवर्णनाभं या सुतं लेभे रवित्विषम् ॥ ३३ ॥
संस्थाप्य धुरि राज्यस्य स्वर्णनाभं गुणाकरम् ।
वाञ्छन् परं पदं राजा श्रीधरं शरणं ययौ ॥ ३४ ॥
चिरं राज्यश्रियं भुक्त्वा तां विसृज्य स्वसूनवे ।
दीक्षित्वा श्रीधरोपान्ते बभूवैकादशाङ्गवित् ॥ ३५ ॥
सिंहनि.क्रीडितं कृत्वा तपस्तीव्रमनाविलम् ।
बबन्ध तीर्थकृन्नाम स्वच्छैः षोडशकारणैः ॥ ३६ ॥
आराध्याराधनामन्ते शास्त्रवार्ताऽनुसारिणीम् ।
वैजयन्ते त्रयस्त्रिंशत्सागरायुरजायत ॥ ३७ ॥
तत्राहमिन्द्रतां प्राप्य स्वप्रभामग्नविग्रहः ।
आत्मपुण्यविपाकेन बुभुजेऽनुपमं सुखम् ॥ ३८ ॥
भारतेऽस्मिन्पदे लक्ष्म्याः ख्याते चन्द्रपुरे पुरि ।
आसीद्राजा महासेनो नम्रसामन्तमण्डलः ॥ ३९ ॥
शचीव लक्ष्मणा तस्य राज्ञी श्रीभिरुपासिता ।
निशान्ते षोडशान् स्वप्नान् सा गजादीनवैक्षत ॥ ४० ॥
तदन्ते कम्पयन्पुण्याद् भुवनानि सुरोत्तमः ।
सितद्विरदरूपेण स विवेश तदाननम् ॥ ४१ ॥
राज्ञे सा कृतसंस्कारा गत्वाऽऽख्यत्स्व च तत्फलम् ।
आख्यच्चो भविता सूनुर्नरेशो जगतामिति ॥ ४२ ॥

धातकीखण्ड द्वीपके पूर्व मन्दराचल पर्वतके पूर्व विदेह क्षेत्रमें स्वस्तिकावती देशकी राजधानी रत्नसंचयपुर है ॥ ३१ ॥ वहाँके राजा कनकाभ और रानी कनकमालासे वह देव पद्मनाभ नामका पुत्र हुआ, जो कि वसन्तके समान मनोहर था ॥ ३२ ॥ उस पद्मनाभके चाँदनीके समान मनोहर सोमप्रभा नामकी रानी थी। उसके सूर्यकी कान्तिके समान प्रतापी सुवर्णनाभ नामका एक पुत्र हुआ ॥ ३३ ॥ पद्मनाभ सर्वगुणसम्पन्न अपने पुत्र सुवर्णनाभको राज्य सौंप कर मोक्ष-प्राप्तिकी इच्छासे दीक्षाके लिए श्रीधर मुनिराजकी शरणमे गया ॥ ३४ ॥ इस प्रकार बहुत समय तक राज्य-लक्ष्मीका भोग कर उसने वह सब वैभव पुत्रको सौंप दिया और श्रीधर मुनिराजके चरणोंमें दीक्षा ले ग्यारह अंगका ज्ञाता हुआ ॥ ३५ ॥ उसने शुद्ध रीतिसे सिंहनिष्क्रीडित नामका महान् तप किया और निर्मल सोलह कारण भावनाओंकी आराधना कर तीर्थंकर प्रकृतिका बन्ध किया ॥ ३६ ॥ अन्तमे शास्त्रानुकूल आराधनाका अभ्यास करते हुए वैजयन्त नामके अनुत्तर विमानमे तेंतीस सागरकी आयुवाला अहमिन्द्र हुआ ॥ ३७ ॥ उस अहमिन्द्रका सम्पूर्ण शरीर कान्तिमय था। उसने वहाँ पूर्व पुण्योदयसे अनुपम सुख भोगे ॥ ३८ ॥

शोभाके क्षेत्र इसी भारतवर्षमें चन्द्रपुर नामका एक नगर है। वहाँ विनीत सामन्तोंसे युक्त महासेन नामका राजा राज्य करता था ॥ ३९ ॥ श्री इत्यादि देवियोसे सेवित उसकी शचीके समान लक्ष्मणा नामकी रानी थी। उसने एक दिन रात्रिके अन्तिम भागमें हाथी आदि सोलह शुभ स्वप्न देखे ॥ ४० ॥ तदनन्तर अपने पुण्य बलसे संसारको कँपाते हुए सुरश्रेष्ठने श्वेत हाथीके रूपमे उस रानीके मुखमें प्रवेश किया ॥ ४१ ॥ प्रातःकाल रानी भूषण शृंगार आदिसे सुसज्जित होकर राजाके पास गई और राजासे उक्त स्वप्नो

तिस्रः कोटीर्हिरण्यानां सार्द्धकोटीर्धनेश्वरः ।
ववर्ष प्रत्यहं गेहे मासान् पञ्चदशानपि ॥ ४३ ॥

जीवं सा सुषुवे काले दिगिवैन्द्री निशाकरम् ।
अनुराधासमायोगं गते स्वच्छे निशाकरे ॥ ४४ ॥

ज्ञात्वा सपदि तत्सूतिमिन्द्राः स्वासनकम्पनैः ।
तत्पुरं देवसेनाभिराययुः समलंकृताः ॥ ४५ ॥

मन्दराऽग्रं जिनं नीत्वा देवेन्द्राः ससुरासुरा. ।
रत्नकुम्भैः पयोगर्भैरभ्यषिञ्चन्पयोऽम्बुधेः ॥ ४६ ॥

अलङ्कारैरलंकृत्य सस्तुत्य स्तुतिभाजनम् ।
चन्द्रप्रभ इति ख्यातं नाम कृत्वा ययु. पुरम् ॥ ४७ ॥

शची न्यस्य तमुत्सङ्गे मातुराकृत्य नाटकम् ।
पूजयित्वा जिनगुरून् देवैरिन्द्रा दिवं ययु ॥ ४८ ॥

विभु. कान्त्येव बालेन्दुर्ययौ वृद्धिं यथा यथा ।
ज्योत्स्नेवेक्ष्वाकुवशश्रीर्ययौ वृद्धिं तथा तथा ॥ ४९ ॥

दिवाऽप्यप्रतिघातिन्या कान्त्या यस्य तनोस्त्विषा ।
आरोहद् व्रीडितो व्योम शशलक्ष्मा शनैः शनैः ॥ ५० ॥

समस्तजनचेतांसि तस्य सद्गुणसंहतिः ।
विवेश सकलाभासिच्छायेव शशिनोऽमला ॥ ५१ ॥

अथ तस्मिन्नरेन्द्रश्रीरपास्य प्रकृतिं निजाम् ।
तद्गुणै. रञ्जिता रेमे कान्तिस्तारापताविव ॥ ५२ ॥

का फल पूछा । राजाने कहा कि हम दोनोके त्रिभुवनका स्वामी श्रेष्ठ पुत्र उत्पन्न होगा।।४२।। इस स्थितिमे इन्द्रकी आज्ञासे कुबेरने साढ़े तीन करोड़ रत्नोको प्रतिदिन उनके घरमे पन्द्रह महीने,तक वर्षाया ।।४३।। नव माह पूर्ण हो जाने पर रानीको पुत्ररत्न उत्पन्न हुआ जिस प्रकार कि पूर्व दिशासे चन्द्रमाका उदय होता है। उस समय निर्मल चन्द्रमाका अनुराधाके साथ योग था।। ४४ ।। इन्द्रोंने अपने आसन कँपनेसे शीघ्र ही भगवान्‌के जन्मको जान लिया और सजधज कर देवोंकी सेनासहित उस नगरमे आये ।। ४५ ।। इसके बाद देवों और असुरो सहित इन्द्रगण भगवान्‌को सुमेरु पर्वत पर ले गये और वहाँ पर क्षीरसागरके जलसे भरे हुए रत्नमयी कलशोंसे भगवान्‌का अभिषेक किया ।। ४६ ।। फिर उन्होंने भगवान्‌को दिव्य आभूषणोंसे अलंकृत किया और नाना प्रकारकी स्तुति कर उनका नाम चन्द्रप्रभ रखा तथा भगवान्‌की जन्मपुरीको लौट आये।।४७।। तत्पश्चात् उन्होंने इन्द्राणीके द्वारा भगवान्‌को माता-की गोदमे रखवाकर आनन्द नाटक किया तथा भगवान्‌की माता-पिताकी पूजाकर देवो सहित इन्द्र स्वर्ग चले गये ।। ४८ ।। बाल चन्द्रमाके समान वे भगवान् शोभासे जैसे-जैसे बढ़ते गये वैसे-वैसे ही चॉदनीके समान उनकी इक्ष्वाकु वंश-रूपी लक्ष्मी वृद्धिको प्राप्त करती गई ।। ४९ ।। भगवान्‌के शरीरकी चमक दिनके प्रकाशमे भी मन्द न पड़ने वाली थी इसीलिए मानो उस कान्तिसे लज्जित हो चन्द्रमा आकाशमे धीरे-धीरे चढ़ रहा था ।। ५० ।। उनका सद्‌गुणसमूह निर्मल चित्तवाले लोगोके चित्तमें इस तरह प्रविष्ट हो गया था जैसे चन्द्रमाकी सम्पूर्ण कलाओंसे भासमान निर्मल छाया ही हो ।। ५१ ।। राज्यलक्ष्मीने उन भगवान्‌को पा अपने चंचल स्वभावको छोड़ दिया था, और उनके गुणोंमें अनुरक्त हो चन्द्रमामें कान्तिके समान, रमण करने लगी थी ।। ५२ ।।

उत्तराणां कुरूणां तां वहन्तीं विपुलां श्रियम् ।
भुवं शशास पुण्यात्मा स दिवं मघवानिव ॥ ५३ ॥

नृपमौलिमणिच्छायाजलधौतक्रमाम्बुजः ।
अमरैरद्भुतान् भोगानतीतान् बुभुजे चिरम् ॥ ५४ ॥

विषयान् विजिहासन्तं किम्पाकफलसन्निभान् ।
जिन लौकान्तिका ज्ञात्वा बोधयित्वा दिवं गताः ॥ ५५ ॥

आगत्येन्द्राः सदेवास्तमभिषिच्य पयोजलैः ।
वस्त्रालङ्कारगन्धाद्यैर्भूषयामासुरुत्तमैः ॥ ५६ ॥

अभिषिच्य सुतं राज्ये संस्थाप्य रवितेजसम् ।
वचोभिः शान्तगर्भैस्तैरवरोध न्यसर्जयत् ॥ ५७ ॥

शिविकां सुविशालाख्यामारुरोह पदं श्रियः ।
सहस्राम्रवनं निन्युस्तामूढ्वा त्रिदशेश्वरा· ॥ ५८ ॥

अवतीर्य ततोऽपास्य तत्र वासो विभूषणम् ।
केशानपानयन्मूर्ध्नः संग्रहैः पञ्चभिर्जिनः ॥ ५९ ॥

अपराह्णेऽनुराधासु षष्ठभक्तोऽमरार्चितः ।
दीक्षां राजसहस्रेणाददे जन्मविभेदिनीम् ॥ ६० ॥

रत्ने पटलके केशान् समुपादाय वासवः ।
क्षीरोदे प्रणिधायैम स्तुत्वा देवैरयाद्दिवम् ॥ ६१ ॥

पुरे नलिनखण्डाख्ये सोमदेवोऽन्यदा ददौ ।
सुभिक्षावृत्तये तस्मै तृतीयेऽहनि पायसम् ॥ ६२ ॥

सोऽवाप वसुधारादिं पूजां मनुजदुर्लभाम् ।
पात्रदानविधिप्रीतमानसैरमरैः कृताम् ॥ ६३ ॥

त्रिमासान् स तपः कृत्वा निरतज्ञानभावन ।
रम्ये चन्द्रपुरोद्याने ध्यानयोगे समास्थितः ॥ ६४ ॥

उन पुण्यात्मा भगवान्‌ने उत्तरकुरुकी भोगभूमि-जैसी विपुल लक्ष्मीको धारण करनेवाली भूमिका शासन किया जैसे इन्द्र स्वर्गका शासन करता है ॥ ५३ ॥ उन भगवान्‌के चरणकमल राजाओंके मुकुट मणिकी छाया रूपी जलसे धोये गये थे। इस प्रकार उन भगवान्‌ने चिरकाल तक पूर्वार्जित भोगोको देवोके साथ भोगा ॥५४॥

एक समय जिनेन्द्रकी, विषफलके समान विषयोंको छोड़नेकी इच्छाको जानकर लौकान्तिक देव आये और उन्हे संबोधित कर स्वर्ग लौट गये ॥ ५५ ॥ तब देवों सहित इन्द्रोंने आकर उनको क्षीरसागरके जलसे स्नान कराया तथा उत्तम वस्त्र अलंकार और गंध आदिसे विभूषित किया ॥५६॥ फिर भगवान्‌ने रवितेज नामक पुत्रका अभिषेक कर राज्यपद पर बैठाया तथा अन्तःपुरकी रानियोंको शान्त वचनोंसे समझाकर लौटाया ॥५७॥ तब वे भगवान् सुविशाला नामकी पालकीमे बैठे और देवगण उसे उठाकर मनोहर सहस्राम्र नामक वनमे ले गये ॥ ५८ ॥ वहाँ उस पालकीसे उतर कर भगवान्‌ने वस्त्र और आभूषणोंका त्याग कर दिया तथा मुष्टिसे पाँच बारमे अपने सिरसे बाल उखाड़कर अलग कर दिये॥५९॥ और दोपहरके समय अनुराधा नक्षत्रमे देवोंसे पूजित उन भगवान्‌ने हजार राजाओंके साथ षष्ठोपवास पूर्वक जन्मान्तरको नष्ट करनेवाली जिनेश्वरी दीक्षा ले ली ॥ ६० ॥ तदनन्तर इन्द्रने रत्नोके पिटारेमे केशोंको रखकर क्षीरसागरमें उनको विसर्जित कर दिया तथा भगवान्‌की स्तुति कर देवोंके साथ वह स्वर्ग चला गया ॥ ६१ ॥ फिर तीसरे दिन आहारके लिए निकले हुए इन भगवान्‌को नलिनखण्ड नामके नगरमे सोमदेव राजाने क्षीरान्नकी पारणा दी ॥६२॥ जिसके प्रभावसे उस राजाके यहाँ धनवृष्टि हुई अर्थात् उसने पञ्चाश्चर्य प्राप्त किये और देवताओने पात्रदानकी विधिसे प्रसन्न होकर उसकी मनुष्यदुर्लभ पूजा की ॥ ६३ ॥ फिर ज्ञान भावनामे लवलीन

फाल्गुनासितपक्षस्य तु मैत्रे सप्तमे दिने ।
अपराह्ने सितध्यानं परमन्तः समाश्रयत् ॥ ६५ ॥
ध्यानेन घातिकर्माणि क्षपयित्वाऽसितश्रिया ।
केवलज्ञानसाम्राज्यमवाप पुरुषोत्तमः ॥ ६६ ॥
ततो जिनमहापुण्याद्राशु कम्पितविष्टराः ।
तज्ज्ञात्वाऽवधिना नाकेन्द्रा लघु समाययुः ॥ ६७ ॥
ईशं प्रदक्षिणीकृत्य प्रणम्याऽनतमौलयः ।
कृत्वाऽष्टौ प्रातिहार्याणि पूजां चक्रुरनुत्तमाम् ॥ ६८ ॥
सृष्ट्वा चतुर्विधं संघं ज्ञानांशुर्जिनचन्द्रमाः ।
निनाय निर्वृतिं लोकानज्ञानोष्णहतात्मनः ॥ ६९ ॥
त्रयो नवतिरीशस्य तस्य दत्तादयस्तथा ।
प्राप्तसप्तर्धयोऽभूवन्सेवनृता गणेश्वराः ॥ ७० ॥
आसंश्च द्विसहस्रास्ते ख्यातपूर्वधरा वराः ।
मुनयोऽष्टसहस्राणि दिव्यावधिविलोचनाः ॥ ७१ ॥
पुनर्दशसहस्राश्च दिव्यकेवलिनोऽभवन् ।
सहस्राश्च तु विज्ञेया वैक्रियाणां चतुर्दश ॥ ७२ ॥
सन्मनःपर्ययवतामष्टौ ते च सहस्रिकाः ।
सहस्रैः सप्तभिर्युक्ताः षट्शतास्तस्य वादिनः ॥ ७३ ॥
लक्षे द्वे शिक्षकाणां तु चतुःशत्या युते पुनः ।
द्विलक्षा मुनयः सर्वे पञ्चाशच्च सहस्रिकाः ॥ ७४ ॥
तिस्रो लक्षा अशीतिश्च सहस्राश्च शुभार्यिकाः ।
तासामग्रेसरी नाम्ना सुलसा शीलधारिणी ॥ ७५ ॥
पञ्चसप्ततिसंख्या चतुःसहस्रैर्विमिश्रिता ।
श्रावकाणां प्रमाणं तु विशिष्टसुखभागिनाम् ॥ ७६ ॥
श्राविकाणां सहस्राणि सैका नवतिर्मानतः ।
चत्वार्य्येव च लक्षाणि शीलाचारसमन्विता ॥ ७७ ॥

हो तीन मास तक तप कर चन्द्रपुर नामके मनोहर उद्यानमें ध्यान योगसे स्थित हो गये ॥ ६४ ॥ तदनन्तर फाल्गुन महीनेके कृष्ण-पक्षकी सप्तमीके दिन अनुराधा नक्षत्रमें दोपहरके समय षष्ठो-पवासपूर्वक शुक्लध्यान प्राप्त किया ॥ ६५ ॥ उस ध्यानयोगके द्वारा चार घातिया कर्मोंको नष्ट करके उन पुरुषश्रेष्ठ भगवान्ने अर्हन्त लक्ष्मीसे विभूषित हो केवलज्ञान-साम्राज्यको प्राप्त किया ॥ ६६ ॥ तब जिनेन्द्रके महापुण्यप्रतापसे शीघ्र ही इन्द्रोंके आसन कम्पित हो गये और अवधिज्ञानके द्वारा भगवान्की कैवल्य-प्राप्तिको जान-कर देवोंसहित वे लोग शीघ्र ही उनके पास आये ॥ ६७ ॥ और उन सबने अपने मुकुटोंको झुकाकर जिनेन्द्रकी प्रदक्षिणा कर प्रणाम किया तथा आठ प्रातिहार्यपूर्वक अपूर्व पूजा की ॥ ६८ ॥ ज्ञान-किरणवाले उन जिनेन्द्रचन्द्रने चार प्रकारके संघका निर्माण कर अज्ञानता रूपी गर्मीसे पीड़ित जनोंको मोक्ष पहुँचाया ॥ ६९ ॥ उन जिनेन्द्रके दत्त आदि ९३ सप्त ऋद्धिधारी तथा देवताओंसे पूज्य गणधर थे ॥ ७० ॥ उनके समवसरणमें दो हजार चौदह पूर्व-धर मुनि थे तथा दिव्य अवधिज्ञानवाले आठ हजार मुनि थे ॥७१॥ दश हजार केवलज्ञानी थे और विक्रिया ऋद्धिवाले चौदह हजार मुनि थे ॥ ७२ ॥ मनःपर्ययज्ञानधारी मुनि आठ हजार थे तथा सात हजार छह सौ वादी मुनि थे ॥ ७३ ॥ दो लाख चार सौ शिक्षक (उपाध्याय) मुनि थे, इस प्रकार सब मुनि दो लाख पचास हजार थे ॥ ७४ ॥ उनके संघमे तीन लाख अस्सी हजार आर्यिकाएँ थीं और उनमें प्रधान सुलसा नामकी आर्यिका थी ॥ ७५ ॥ तीन लाख विशिष्ट पुण्य लाभ करनेवाले श्रावकोंका प्रमाण था ॥ ७६ ॥ श्राविकाओंकी संख्या, जो कि उत्तम शील और आचारसे सम्पन्न थी,—चार लाख ९१ हजार थी ॥ ७७ ॥ वे जिनेन्द्र प्राणियोंके कल्याणके लिए तथा चित्तको प्रसन्न करते हुए बहुत समय तक

विहृत्य देहिनां भूत्यै भुवं कालं चिरं जिनः ।
सम्मेदस्याऽग्रमारोहद्रिरेश्चित्तानुरञ्जिनः ॥ ७८ ॥

मास विहृतिमुत्सृज्य धूलशेषरजोमलः ।
ययौ मुनिसहस्रेण ज्येष्ठासु पदमक्षरम् ॥ ७९ ॥

सम्यक्त्वज्ञानसद्दृष्टिवीर्यसूक्ष्माऽवगाहना ।
अगुरुलघुताबाधैर्गुणैरष्टाभिरन्वितः ॥ ८० ॥

अथागत्य क्षिप्रं त्रिदशपतयः सामरगणाः
प्रभागन्धोद्दामोदककुसुमगन्धप्रभृतिभिः ।
तनोः पूजां कृत्वा त्रिभुवनगुरोरद्भुततमां
ययुः स्वानावासान् जिनगुणकथारञ्जितधियः ॥ ८१ ॥

इत्येवं मतिचापलोद्गतगिरा नूतो मया मालया
ज्ञानज्योतिरपास्तमोहनिचयस्थेयोऽन्धकारोदयः ।
शान्तात्मा जगतां पतिर्निरुपमोऽनन्तोऽक्षरः शङ्करो
दत्ताज्ञो रजसां जयं लघु जिनश्चन्द्रप्रभोऽनुत्तमः ॥ ८२ ॥

श्रीवर्मा श्रीधर. स्वर्गेऽजितसेनोऽच्युतः सुरः ।
पद्मनाभोऽहमिन्द्रो यस्तं वन्देऽहं शशिप्रभम् ॥ ८३ ॥

सागरोपमकोटीनां नवतिस्तीर्थसन्ततिः ।
यस्य कुन्देन्दुदीप्तं तं वन्दे चन्द्रप्रभं सदा ॥ ८४ ॥

इति पुराणसारसंग्रहे चन्द्रप्रभचरितं समाप्तम्

पृथिवी पर विहार कर सम्मेदशिखर पर्वतके शिखर पर आरूढ़ हुए ॥ ७८ ॥ एक मास तक विहार करना वन्दकर उन्होंने बाकीके चार अघातिया कर्मोंका नाश किया तथा ज्येष्ठा नक्षत्रमे हजार मुनियोंके साथ निर्वाण पदको प्राप्त हुए ॥ ७९ ॥ वहाँ वे जिन क्षायिक सम्यक्त्व, अनन्त ज्ञान, अनन्त दर्शन, अनन्त वीर्य, सूक्ष्मत्व, अवगाहनत्व, अगुरुलघुत्व, अव्यावाधत्व इन आठ सिद्धोंके गुणोंसे सुशोभित थे ॥ ८० ॥ देवताओं सहित इन्द्रगण वहाँ शीघ्र ही निर्वाणकल्याणक मनाने आये और दीप, धूप, जल, पुष्प और चन्दन, आदिसे उन त्रिभुवनपति जिनभगवान्के शरीरकी अद्भुत पूजा की तथा जिनेन्द्रकी गुणकथासे अपने चित्तको आह्लादित करते हुए वे अपने स्थानोंको लौट गये ॥ ८१ ॥

इस प्रकार चपलमतिसे प्रेरित वाणी द्वारा ज्ञानज्योति से निश्चल मोहान्धकारको नाश करनेवाले शान्तात्मा, जगत्पति, अनुपम, अनन्त, अक्षर और शंकर आदि नामावलिसे स्तुत वे महान् चन्द्रप्रभ भगवान् हमारे कर्ममलको शीघ्र क्षय करें ॥ ८२ ॥ जो कि अपने पूर्वभवोंमे श्रीवर्मा, स्वर्गमे श्रीधर, अजितसेन, फिर अच्युतेन्द्र, इसके बाद पद्मनाभ, फिर अहमिन्द्र हुए उन चन्द्रप्रभको नमस्कार है ॥ ८३ ॥ उन जिनेन्द्रकी तीर्थपरम्परा ९० सागर कोटि प्रमाण थी । स्वच्छ चन्द्रमाकी कान्तिवाले उन चन्द्रप्रभको मै सदा प्रणाम करता हूँ ॥ ८४ ॥

इस प्रकार पुराणसार संग्रह नामक पुराणमें चन्द्रप्रभ चरित समाप्त हुआ ।

———

श्री शान्तिनाथचरितम्

प्रथमः सर्गः

शांतिं जगदतिशान्तिं प्रणम्य मूर्ध्ना त्रिलोकशान्त्यर्थम् ।
वक्ष्यामि शान्तिचरितं शान्तिकर सर्वजीवानाम् ॥ १ ॥

नामावलिकनिबद्धं द्वादशभवसंश्रितं सुधर्मेण ।
श्रुतकेवलिनाऽभिहितं जम्बूनाम्नेऽन्त्यकेवलिने ॥ २ ॥

इतिहासमिमं पुण्य श्रवणीय श्रृणुत बद्धमार्याभिः ।
सम्राजा पञ्चमकं तीर्थंकराणां च षोडशकम् ॥ ३ ॥

जम्बूद्वीपे भारतवास्ये विजयार्द्धदक्षिणश्रेण्याम् ।
राजाऽसीज्ज्वलनजटी रथनूपुरचक्रवालपुरे ॥ ४ ॥

देव्यस्य वायुवेगा सुतोऽर्ककीर्ति स्वयम्प्रभा च सुता ।
अश्वग्रीवाद्यैः सा प्रयाचिता खेचरै ख्याता ॥ ५ ॥

राजा वसन्तमासे गत्वा सान्तःपुरोऽन्यदोद्यानम् ।
[1]जगदभिनन्दनपार्श्वे पृष्ट्वा जग्राह सम्यक्त्वम् ॥ ६ ॥

कन्याऽन्यदा जिनानां प्रोपधयुक्ताऽर्चन सुसस्कृत्य ।
शेषां पित्रे दत्त्वा प्रपूजिता प्राविशत् पिता तु ॥ ७ ॥

आपूर्णयौवनां तां दृष्ट्वा कस्मै सुता प्रदेयेति ।
सञ्चिन्त्य मन्त्रशालां प्रविश्य मन्त्रिभ्य आख्यत्तत् ॥ ८ ॥

---

१ 'जगन्नाभिनन्दन' इति उत्तरपुराणे ।

श्री शान्तिनाथ चरित

प्रथम सर्ग

संसारमे अति शान्त और सर्व प्राणियोको शान्तिदायक शान्तिनाथ भगवान्‌को सिर झुका प्रणाम कर मैं तीन लोकोकी शान्तिके लिए भगवान् शान्तिनाथके चरितको कहता हूं ॥ १ ॥ यह चरित सुधर्म नामके श्रुतकेवलीने अन्तिम केवली जम्बू स्वामीको उनके बारह भवोंकी नामावलि पूर्वक कहा था ॥ २ ॥ चक्रवर्तियोमे पॉचवें तथा तीर्थंकरोमे सोलहवें उन शान्तिनाथ भगवान्‌के पुण्यवर्धक, सुनने योग्य तथा आर्या छन्दोंमे निबद्ध इस चरितको आप सब भी सुनें ॥ ३ ॥

इसी जम्बूद्वीप सम्बन्धी भारतवर्षके विजयार्द्ध पर्वतकी दक्षिण श्रेणीमे रथनूपुरचक्रवाल नामके नगरमे ज्वलनजटी नामका राजा था ॥ ४ ॥ उसके वायुवेगा नामकी रानी थी तथा पुत्रका नाम अर्ककीर्ति और पुत्रीका नाम स्वयंप्रभा था। अश्वग्रीव आदि कुछ विद्याधरोंने उस कन्याकी मंगनी की थी ॥ ५ ॥ किसी समय वसन्त महीनेमे राजाने अन्तःपुर सहित वनमे जगन्नन्दन और अभिनन्दन मुनिके पास जाकर और तत्त्व चरचा कर सम्यग्दर्शन ग्रहण किया ॥ ६ ॥ किसी अन्य समयमे प्रोषधव्रत धारण कर उस कन्या स्वयम्प्रभाने जिन भगवान्‌की पूजा कर, और अपने पिताको शेषा प्रदान कर तथा उनसे आशीर्वाद प्राप्त कर घरमें प्रवेश किया ॥ ७ ॥ पिताने भी उसे पूर्णयौवना देख यह कन्या किसे देनी चाहिये ऐसा विचार कर मंत्रशालामे प्रवेश किया और

श्रुत्वा सुतानिमित्तं मन्त्री त्वेकोऽब्रवीदुदक्छ्रेण्याम् ।
अश्वग्रीवोऽस्त्यलकापुर्यां भार्या च कनकेति ॥ ९ ॥

नीलरथनीलकण्ठौ वज्रसुकण्ठौ च मातृजास्तस्य ।
मन्त्री च हरिश्मश्रुः शतबिन्दुश्चाऽपि नैमित्तः ॥ १० ॥

उभयश्रेणिस्वामी सर्वे विद्याधराश्च तद्वश्याः ।
बहुशो याचितवानपि बाला तस्मै प्रदेयार्य ॥ ११ ॥

अश्वग्रीवाय कन्या देयेति सुश्रुतेनोक्ते ।
सोऽतीतवयस्को बालेयमिति बहुश्रुतोऽवोचत् ॥ १२ ॥

शृणु गगनवल्लभपुरे राजा सिंहध्वजोऽतिवीर्यः ।
पद्मरथो मेघपुरे हेमाङ्गश्चित्रकूटे च ॥ १३ ॥

किन्नरगीते पवनञ्जयोऽस्ति मेघस्वरोऽप्यमृतवल्याम् ।
नरगीते हरिकम्पस्त्रिपुरे ललिताङ्गदश्चापि ॥ १४ ॥

रत्नपुरे रत्नरथोऽस्त्यरिञ्जयो रत्नसञ्चये राजा । .
श्रीनिलये चित्ररथोऽप्यश्वपुरे कनकचित्रश्च ॥ १५ ॥

एते खेचरसिंहाः साधितविद्याः समाश्च वयसाऽन्या. ।
एभ्यो वरं वरिष्ठं परीक्ष्य तस्मै प्रयच्छामः ॥ १६ ॥

श्रुतसागरो बभाषे सुरेन्द्रकान्तारमुत्तरश्रेण्याम् ।
पुरमस्ति मेघवाहननृपोऽस्य भार्या च मेघवती ॥ १७ ॥

ज्योतिर्माला च सुता नाम्ना विद्युत्प्रभश्च सुतः ।
स किल पूर्वभवे जयसेनानन्दनमनु प्रणाम्यान् ॥ १८ ॥

श्रुत्वा धर्मोपदेशं समयपार्श्वे चतु महर्षेस्तु ।
सपदि प्रशमरसाऽग्रं माहेन्द्रकल्पेऽद् गतश्च्युता ॥ १९ ॥

मन्त्रियोके समक्ष इसकी चरचा की ॥ ८ ॥ पुत्रीके निमित्तकी यह बात सुनकर एक मंत्रीने कहा—उत्तर श्रेणीकी अलकापुरीमे अश्वग्रीव नामका विद्याधर और उसकी भार्या कनका [कनकचित्रा] रहते हैं ॥ ९ ॥ उसके नीलरथ, नीलकण्ठ, वज्रकण्ठ और सुकण्ठ नामके चार भाई हैं तथा हरिश्मश्रु मंत्री है और शतबिन्दु, नैमित्तिक है ॥ १० ॥ वह दोनो श्रेणियोका राजा है और सभी विद्याधर उसके वशमे हैं, तथा उसने इस कन्याके लिए कई बार याचना भी की है। इसलिए हे स्वामी! यह कन्या उसे ही देनी चाहिये ॥ ११ ॥

"अश्वग्रीवको कन्या देनी चाहिये" यह सुश्रुतका सुझाव सुनकर बहुश्रुत नामके मंत्रीने कहा कि वह बहुत बड़ी आयुवाला है और यह कन्या अभी बाला ही है। इसलिए सुनिये, गगनवल्लभ पुरमे अति पराक्रमी सिंहध्वज तथा मेघपुरमे पद्मरथ और चित्रकूट मे हेमाङ्ग, किन्नरगीतपुरमें पवनञ्जय, अमृतवतीमे मेघस्वर, नरगीतपुरमें हरिकम्प, त्रिपुरमे ललिताङ्गद, रत्नपुरमें रत्नरथ, रत्न-संचयपुरमें अरिञ्जय, श्रीनिलयमें चित्ररथ तथा अश्वपुरमें कनकचित्र ये सब राजा हैं ॥ १२–१५ ॥ ये सब विद्याधरोंमे सिंह हैं तथा इन्होने विद्याओको साधा है और इस कन्याके समान वयवाले हैं। इसलिए इनमेसे जो श्रेष्ठ वर हो उसे देख हमें कन्या देनी चाहिये ॥ १६ ॥

तब श्रुतसागर नामके मंत्रीने कहा कि स्वामिन्, उत्तर श्रेणीमे सुरेन्द्रकान्तार नामका नगर है। वहाँ मेघवाहन राजा और उसकी रानी मेघवती रहते हैं। उन दोनोके ज्योतिर्माला नामकी पुत्री और विद्युत्प्रभ नामका पुत्र है। वह विद्युत्प्रभ पूर्वभवमे प्रभाकरी नामकी नगरीमे रानी जयसेना और राजा नन्दनका पुत्र यशोधर हुआ था, और उसने दमवर मुनिके पास चार हजार राजाओंके

इह चरमदेहधारी सिद्धोऽयमिति श्रुत मया पृष्टे ।
पित्रे वरधर्मोक्तं ददामि तस्मै कुमारीं नः ॥ २० ॥

सुमतिश्च राजमन्त्री विज्ञापयति स्म नरपतिं कार्यम् ।
सर्वेष्वविरुद्ध इति स्वयंवरो रोचते मेऽस्तु ॥ २१ ॥

श्रुत्वाऽथ मन्त्रिवाक्यं सोऽष्टाङ्गमहानिमित्ततत्त्वज्ञम् ।
सम्भिन्नश्रोतार राजा सम्पूज्य पप्रच्छ ॥ २२ ॥

को मे दुहितुर्भर्त्ता भवितेत्युक्ते जगाद दैवज्ञः ।
भुवि दक्षिणार्द्धभरते प्रजापतिः पौदनपुरस्येति ॥ २३ ॥

नाम्ना जयाऽस्य भार्या मृगावती चेति तत्सुतौ ख्यातौ ।
विजयत्रिपृष्ठ इति तौ हलचक्रधरौ च भवितारौ ॥ २४ ॥

अश्वग्रीवं हत्वा प्रतिशत्रुं पर्वते रथावर्त्ते ।
उत्पन्नसर्वरत्नौ सितासितौ भोक्ष्यतः पृथिवीम् ॥ २५ ॥

त्वमपि प्राप्स्यसि राजन् विद्याधरचक्रवर्तितां ताभ्याम् ।
तस्माद् दुहितरमाशु प्रयच्छ नीत्वा त्रिपृष्ठाय ॥ २६ ॥

श्रुत्वा सम्भिन्नगिरं प्रतिगृह्य तथाऽस्त्विति प्रपूज्यैनम् ।
पौदनपुराय दूतं शुचिमिन्दु प्रेषयामास ॥ २७ ॥

प्रत्यागते स्वदूते रथनूपुररक्षकान् सुसंस्थाप्य ।
नीत्वा महाविभूत्या प्रददौ कन्यां त्रिपृष्ठाय ॥ २८ ॥

तच्छ्रुत्वाश्वग्रीव स्वदूतवचनात्सन्मन्त्रिबन्धुयुतः ।
चतुरङ्गया ध्वजिन्या महीतले योद्धुमागच्छत् ॥ २९ ॥

साथ युवा अवस्थामे ही दीक्षा ले ली थी और शरीर छोड़ महेन्द्र स्वर्गमें देव हुआ था ॥ १७–१९ ॥ फिर वहाँसे च्युत होकर वह यहाँ चरमदेहधारी हुआ है । यह मैंने वरधर्म नामके मुनिसे सुना था । इसलिए हम लोग यह राजकुमारी उसीको दें ॥ २० ॥

इसपर सुमति नामके राजमंत्रीने राजासे निवेदन किया कि मैं किसीके विरुद्ध नहीं हूं इसलिए मुझे 'स्वयंवरपद्धति' पसंद है ॥ २१ ॥ मंत्रीके इस वचनको सुन राजाने अष्टांग महानिमित्तके ज्ञाता संभिन्नश्रोतासे सत्कारपूर्वक पूछा ॥ २२ ॥ कि "मेरी पुत्रीका पति कौन होगा" ऐसी वात सुन उस निमित्तज्ञने कहा कि उसी द्वीपके भारत देशकी दक्षिण दिशामे पोदनपुरका राजा प्रजापति और उसकी रानी जया व मृगावती रहते हैं । उन दोनोके क्रमशः विजय तथा त्रिपृष्ठ नामके दो पुत्र हैं जो क्रमशः वलदेव तथा नारायण होनेवाले हैं । वे इस पर्यायमे रथनूपुर नगरके अपने प्रतिद्वन्द्वी विद्याधर-राजा अश्वग्रीवको रथावर्त पर्वतपर मारेंगे और फिर वे दोनों सर्व रत्नोंको पाकर पृथिवीका भोग करेंगे ॥ २३–२५ ॥ तथा हे राजन्! उन दोनोंके द्वारा तुम भी विद्याधरोंके सम्राट् पदको पाओगे । इसलिए शीघ्र ही कन्याको ले जाकर त्रिपृष्ठको दे दीजिये ॥ २६ ॥

सभिन्नश्रोताकी वात सुनकर राजाने यह वात मान ली और दृढ़ निश्चय किया कि उसीको कन्या देंगे । फिर राजाने उस निमित्तज्ञका खूव आदर-सत्कार किया और इन्दु नामके योग्य दूतको पोदनपुर भेजा ॥२७॥ अपने दूतके लौट आनेपर रथनूपुरमें रत्नोंको रखकर तथा कन्याको ले जाकर राजाने वहुत विभूतिके साथ उसे त्रिपृष्ठको विवाह दिया ॥ २८ ॥ यह वात अपने दूतके मुँहसे मंत्री तथा भाइयों सहित अश्वग्रीवने सुनी और चतुरंगिणी सेना सहित युद्ध करनेके लिए युद्धभूमिमे आ गया ॥२९ ॥

तं प्रजापतिसुतावभिषिच्य खगेन्द्रचक्रवर्तित्वम् ।
दत्त्वा तस्मै तस्मात्प्रसह्य विद्ये स्म साधयतः ॥ ३० ॥

सिद्धे च महाविद्ये तयोर्गरुडसिंहवाहिन्यौ ।
पश्चात्स्वसैन्यसहितौ जग्मुः सर्वे रथावर्त्तम् ॥ ३१ ॥

मायासहस्रयुक्तं विद्याधरभूमिगोचरेन्द्राणाम् ।
युद्धं बभूव घोरं नानाऽऽयुधविहतविध्वस्तम् ॥ ३२ ॥

विजयोऽरिसुतभ्रातॄन् ज्वलनजटीसुतोऽपि सर्वतो नृपतीन् ।
अवधीदश्वग्रीवं तं चक्रिणं त्रिपृष्ठश्च ॥ ३३ ॥

उत्पन्नसप्तरजः प्रापज्जित्वाऽर्धचक्रवर्तित्वम् ।
मामोऽपि चक्रवर्त्ती स्वपुरमयाच्चक्रिणा युक्तः ॥ ३४ ॥

जाताऽर्ककीर्त्तिभार्या सुरेन्द्रकान्तारनृपतिजा कन्या ।
तत्पुत्रोऽमिततेजाः सुता च तस्याः सुतारेति ॥ ३५ ॥

जगदभिनन्दनपार्श्वे प्राव्राजीदर्ककीर्त्तिमभिषिच्य ।
कृत्वा च तपः सम्यग्ज्वलनजटी निर्वृतिं प्रापत् ॥ ३६ ॥

पुत्रौ स्वयम्प्रभायां जातौ श्रीविजयविजयनामानौ ।
ज्योतिःप्रभेति नाम्ना ताभ्यां च कनीयसी जज्ञे ॥ ३७ ॥

पिहितास्रवस्य पार्श्वे निष्क्रम्योग्रं प्रजापतिर्नृपतिः ।
कृत्वा सुतपश्चरणं निर्वाणमनुत्तरं प्रापत् ॥ ३८ ॥

दुहितुः स्वयंवरार्थं त्रिपृष्ट आह्वयत् खगेन्द्रभूमीन्द्रान् ।
श्रुत्वाऽर्ककीर्तिरायात् सुतामादाय तत्रैव ॥ ३९ ॥

ज्योतिष्प्रभा हि यमेऽमिततेजसमात्ममैथुनं तत्र ।
श्रीविजयं च सुतारा मालामालोचयत्तुष्ट्या ॥ ४० ॥

इधर प्रजापति राजाके उन दोनो पुत्रों—त्रिपृष्ठ और विजयने उस ज्वलनजटीको राज्यतिलक कर विद्याधरोंका चक्रवर्ती वनाया तथा उससे दी गई दो विद्याओंको उन्होने सिद्ध किया ॥ ३० ॥ उन दोनोंको गरुड़वाहिनी तथा सिंहवाहिनी दो महाविद्याएँ सिद्ध हो गई तथा सव मिल अपनी-अपनी सेना सहित रथावर्त पवतपर गये ॥ ३१ ॥ वहॉपर विद्याधर और भूमिगोचरी राजाओंका हजारों प्रकारके छलोंसे भरा हुआ और नाना प्रकारके आयुधोंसे विध्वंसकारी घोर युद्ध हुआ और उसमे भीषण रक्तपात हुआ ॥ ३२ ॥ वलभद्र विजयने शत्रुके पुत्र और भाइयोंको तथा ज्वलनजटीके पुत्रने अन्य शत्रुपक्षीय राजाओंको और त्रिपृष्ठने अश्वग्रीव प्रतिनारायणको मार डाला ॥ ३३ ॥

अश्वग्रीवको जीत लेनेके वाद उस त्रिपृष्ठको सप्त रत्न प्राप्त हुए और अर्द्धचक्रवर्ती पद भी मिला। वह ज्वलनजटी भी अर्धचक्रवर्ती त्रिपृष्ठके साथ अपने नगरको लौट आया ॥ ३४ ॥

ज्वलनजटीके पुत्र अर्ककीर्त्तिकी पत्नी सुरेन्द्रकान्तार देशके राजाकी पुत्री थी। उन दोनोंके अमिततेज पुत्र तथा सुतारा नामकी पुत्री हुई ॥ ३५ ॥ ज्वलनजटीने अर्ककीर्तिका राज्यतिलक कर जगदभिनन्दन जिनेन्द्रके पास दीक्षा ले ली। तथा अच्छी तरह तप कर उसने मोक्षपद प्राप्त किया ॥ ३६ ॥

त्रिपृष्ठके स्वयंप्रभासे श्रीविजय और विजय नामके दो पुत्र हुए तथा ज्योतिःप्रभा नामकी दोनोंसे छोटी पुत्री हुई ॥ ३७ ॥ त्रिपृष्ठके पिता राजा प्रजापतिने पिहिताश्रव मुनिके समीप दीक्षा धारण कर घोर तपस्या की और परमपद-निर्वाण प्राप्त किया ॥३८॥ अनन्तर त्रिपृष्ठने अपनी कन्याके स्वयंवरके लिए विद्याधर और भूमिगोचरी राजाओंको वुलाया। यह सुनकर अर्ककीर्ति भी अपनी पुत्री सुताराको लेकर वहॉ आया। वहॉ ज्योतिष्प्रभाने

दृष्ट्वा स्वयंवरं तं क्षत्रगणाः साधु साध्विति ब्रुवन्तः ।
बलभद्रवासुभद्रौ पृष्ट्वा स्वं स्वं ययुर्नगरम् ॥ ४१ ॥

वर्षशतसहस्राणि चतुरशीतिं दिव्यमानुषान् भोगान् ।
भुक्त्वा ततस्त्रिपृष्ठः श्वभ्रं यातस्तु भोगेच्छः ॥ ४२ ॥

श्रीविजयमाधिराज्ये विजयं संस्थाप्य यौवराज्ये च ।
निष्क्रान्तो बलदेवः सुवर्णकुम्भान्तिके दुःखी ॥ ४३ ॥

श्रुत्वा तदर्ककीर्तिर्दत्त्वाऽमिततेजसे राज्यम् ।
प्राव्राजीन्निर्विण्णो विमलाऽमलबुद्धिमुनिपार्श्वे ॥ ४४ ॥

श्रीविजयस्यामिततेजसश्च सङ्गतमजर्यमेवासीत् ।
अन्योन्यागमनगमनसम्प्रेषणलेखपरिवृद्धम् ॥ ४५ ॥

एवं गतवति काले श्रीविजयं कश्चिदेत्य दैवज्ञः ।
विजयस्वेत्युक्त्वोच्चैः शृणु देवेत्यब्रवीद्वाक्यम् ॥ ४६ ॥

यः पोदनाधिपस्तस्य मस्तके सप्तमे दिने राजन् ।
अशनि. पतिष्यति यच्छ्रेयस्तत्कुरुष्वेति ॥ ४७ ॥

युवराजोऽवदच्छ्रुत्वा यदि नरपतिमस्तके पतेदशनिः ।
तव शिरसि किं पतिष्यति तद्दिवसे ब्रूहि नैमित्त ॥ ४८ ॥

इत्युक्तो नैमित्तो बभाण तद्दिवसे मच्छिरसि पूजा ।
कुम्भाष्टसहस्रयुता निपतिष्यति रत्नवृष्टिश्च ॥ ४९ ॥

श्रुत्वा श्रीविजयस्तं दत्त्वाऽऽसनमब्रवीद् द्विजं मधुरम् ।
किन्नामासि कुतस्त्यो विद्याऽधीता त्वया केति ॥ ५० ॥

अमिततेजको अपने पतिके रूपमे वरण किया तथा सुताराने श्रीविजयके गलेमे अपनी माला प्रेमपूर्वक डाल दी ॥३६-४०॥ तब क्षत्रिय लोगोंने उस स्वयंवरको देखकर "साधु साधु" शब्दोंसे प्रशंसा की तथा बलभद्र और नारायणसे पूछकर अपने-अपने नगरों को लौट गये ॥ ४१ ॥ त्रिपृष्ठने चौरासी लाख वर्षों तक दिव्य और मनुष्य सम्बन्धी भोगोंको भोगा फिर भोगोंसे अतृप्त हो आयु पूरी होने पर नरक गया ॥ ४२ ॥

बलदेवने श्रीविजयको राज्यपद पर और विजयको यौवराज्य पद पर स्थापित कर दुःखित हो सुवर्णकुम्भ मुनिके पास दीक्षा ले ली ॥ ४३ ॥ यह सुन अर्ककीर्ति विद्याधर भी अमिततेज नामके पुत्रको राज्य देकर विरक्त हो गया और उसने निर्मल बुद्धिवाले अमलबुद्धि मुनिके पास दीक्षा ले ली ॥ ४४ ॥ श्रीविजय और अमिततेजकी एक दूसरेके पास आने-जाने, सन्देश भेजने और पत्रव्यवहारसे पुष्ट हुई घनिष्ट मित्रता हो गई ॥४५॥

इस प्रकार समय बीतता गया। एक समय एक निमित्तज्ञ श्रीविजयके पास आया और उच्च स्वरसे 'जय हो' कहकर बोला कि हे राजन्! सुनिये। पोदनपुरके राजाके ऊपर आजसे सातवें दिन वज्रपात होगा इसलिए जो उपाय हो कीजिये ॥ ४६-४७ ॥ यह सुनकर युवराज विजयने कहा कि यदि उस दिन नरपतिके ऊपर वज्र गिरेगा तो हे निमितज्ञ! तुम्हारे शिर पर क्या गिरेगा, बतलाओ ॥ ४८ ॥ निमितज्ञने उत्तर दिया कि उस दिन मेरे शिर पर १००८ कुम्भोंसे अभिषेक व पूजा होगी और रत्नवृष्टि भी होगी ॥ ४९ ॥ यह बात सुनकर श्रीविजयने उस ब्राह्मणको आसन पर बैठाया और मधुर शब्दोंमें पूछने लगा कि आपका नाम क्या है? आप कहाँके रहनेवाले हैं और कहाँ विद्या पढ़ी है ॥ ५० ॥

पृष्टो नरपेणैवं विप्रः प्रोवाच नामकुलगोत्रम् ।
कुण्डलपुरसिंहरथस्य मत्पिताऽसीच्च नैमित्तः ॥ ५१ ॥

शौण्डिल्यायनगोत्रो सुरगुरुशिष्यो विशारदो नाम्ना ।
अहमपि नाम्ना राजन्नमोघजिह्वश्च तत्पुत्रः ॥ ५२ ॥

बलदेवप्रव्रजनं यदा सहासीन्नृपोत्तमैर्बहुभिः ।
प्राव्राजिषं तदानीं सह पित्रा जातरागोऽहम् ॥ ५३ ॥

ज्योतिर्ज्ञाने प्रीतः परीषहैर्दुःसहैः पुनर्भग्नः ।
व्यपगतसाधुगणोऽहं संप्रापं पद्मिनीखेटम् ॥ ५४ ॥

सोमार्यो मे मामो हिरण्यलोमा पितृष्वसा तत्र ।
चन्द्राननेति दुहिता पूर्वोद्दिष्टा च मे दत्ता ॥ ५५ ॥

आजीविकाकारणार्थं लाभं दृष्ट्वाऽहमागतोऽस्मीह ।
इत्युक्तः श्रीविजय. सन्मन्त्रिभिर्मन्त्रमारेभे ॥ ५६ ॥

सुमतिरभाषत मन्त्री मञ्जूषामायसीं व्यपेतविलाम् ।
कृत्वा समुद्रमध्ये तस्यां निदधाम राजानम् ॥ ५७ ॥

श्रुत्वा सुबुद्धिसंज्ञस्तदब्रवीदग्निमेववर्षासु ।
अन्तेऽतिदुःषमायां निपतत्स्विह भारते वास्ये ॥ ५८ ॥

आदिक्लिष्टान्ते जीवाः प्रविश्य यस्यां महागुहायाम् ।
अन्तर्विजयार्द्धेऽतोऽथो वयं नयामोऽत्र राजानम् ॥ ५९ ॥

उक्तं तयोर्निशम्य स्म भाषते बुद्धिसागरो मन्त्री ।
शृणुतैकमुपाख्यानं मृगमिदं कुम्भकारभटे ॥ ६० ॥

राजाके इन प्रश्नों पर ब्राह्मणने अपने नाम, कुल और गोत्रको बतलाया और कहा कि मेरे पिता कुण्डलपुरके राजा सिंहरथके निमित्तज्ञ थे। इनका गोत्र शौण्डिल्यायन था। वे सुरगुरुके शिष्य थे और विशारद उनका नाम था। हे राजन्! मैं भी अमोघजिह्व नामका उनका पुत्र हूँ ॥ ५१-५२ ॥ जब बहुतसे श्रेष्ठ राजाओंके साथ बलदेवने दीक्षा ली थी तब मैं भी रागवश पिताके साथ दीक्षित हो गया था ॥ ५३ ॥ पर ज्योतिषके ज्ञानमें विशेष अनुराग होनेसे तथा परिषह न सह सकनेके कारण मैं साधु संघसे अलग होकर पद्मिनीखेट नगरमें पहुँचा ॥ ५४ ॥ वहाँ मेरे मामा सोमार्य और मेरी फुआ हिरण्यलोमा थी। उन्होंने चन्द्रानना नामकी अपनी पुत्रीसे मेरा विवाह कर दिया जिसका पहलेसे ही मेरे साथ विवाह करनेका उन्होंने संकल्प कर लिया था। आजीविकाके निमित्त लाभ देखकर मैं यहाँ आया हूं"—यह सुन श्रीविजयने अपने मन्त्रियोंसे सलाह लेना प्रारम्भ किया, कि उस राजाकी रक्षाके लिए क्या करना चाहिये ॥ ५५-५६ ॥

सुमति नामके मन्त्रीने कहा कि निश्छिद्र लोहेकी पेटीको समुद्रमें रखकर उसमें राजाको बैठा देना चाहिए ॥ ५७ ॥ सुबुद्धि मन्त्रीने कहा कि अतिदुःषमा कालके अन्तमें इस भारतवर्षमें अग्नि और मेघकी वर्षा होने पर विजयार्ध पर्वतकी जिस महागुफामें रहकर कुछ जीव अपने प्राण बचावेंगे उस गुफामें ही हमें राजाको ले चलना चाहिये ॥ ५८-५९ ॥ उन दोनोंकी यह बात सुन बुद्धिसागर नामके मन्त्रीने कहा कि मैं एक उपाख्यान कहता हूँ सुनिये—

कुम्भकारपुर नामके ग्राममें चण्डकौशिक नामका ब्राह्मण और उसकी सोमश्री नामकी स्त्री रहती थी, जो निःसन्तान थी। उन्होंने चिरकाल तक भूतोंकी पूजा की जिससे उन्हें एक पुत्र

सोमश्रीरनपत्या तद्विप्रश्चण्डकौशिकश्चासीत् ।
नमसित्वा भूतांस्तौ चिरकालात्पुत्रमलभेताम् ॥ ६१ ॥
सोऽपि च वानरवदनः परिवृद्धो मौण्डकौशिको नाम्ना ।
तन्नगरे कृतसमयः पुरुषाशी राक्षसः कुम्भः ॥ ६२ ॥
ब्राह्मणवारे प्राप्ते भूतैः शरणागतो द्विजो भणितः ।
त्वं राक्षसे निवेदय वयमस्मादुद्धरिष्यामः ॥ ६३ ॥
दत्तो द्विजेन पुत्रो भूतैरुद्धृत्य गिरिविले क्षिप्तः ।
तत्र च बुभुक्षितः सन्नगिलदजगरस्तकं बटुकम् ॥ ६४ ॥
एवं यत्प्रासव्यं तत्क्वचिदपि प्राप्यते ध्रुवं जीवैः ।
तस्मादिहैव शान्ति कुर्वाणा उपविशामैक' ॥ ६५ ॥
मतिसागरश्चतुर्थः प्राभाषत मन्त्रिकुञ्जरो वाक्यम् ।
सञ्चिन्त्योक्तं तेषां विचार्य स्वबुद्ध्येत्थम् ॥ ६६ ॥
पोदनपुराधिपतिमस्तकेऽशनिर्निपतितेति तेनोक्तम् ।
नोक्तं नामोद्दिश्य च यस्माच्छ्रीविजयशिरसीति ॥ ६७ ॥
तस्मादेवमिह पुरे राजानं पूजितं करिष्यामः ।
चैत्य व्यपेतराज्य' श्रीविजयोऽप्यस्तु सप्ताहम् ॥ ६८ ॥
इत्युक्तेऽस्त्विति सर्वे प्रतिमाऽऽगारं प्रविश्य ददृशुस्ते ।
सोमेन्द्रवरुणयमरविवैश्रवणानाञ्च तत्राऽर्चाः ॥ ६९ ॥
वैश्रवणस्य प्रतिमां प्रणिधाय च सर्वलक्षणोपेताम् ।
महद्धर्याऽधिराज्ये तां सर्वे संस्थापयाञ्चक्रुः ॥ ७० ॥
वैश्रवणमहाराजं सभागृहे पट्टचामरोपेतम् ।
स्वैः स्वैर्यथानियोगैर्निषिषेविरे श्रेणयः सर्वा. ॥ ७१ ॥
राजाऽपि चतु शरण प्रपद्य कुर्वन् जिनेन्द्रवरपूजाम् ।
उद्घोषितमाघातश्चासाञ्चक्रे जिनायतने ॥ ७२ ॥

हुआ। वह बन्दर-जैसे मुखवाला था तथा बुड्ढों-जैसा था। उसका नाम मौण्डकौशिक था। उसी नगरमे मनुष्य खानेवाला कुम्भ नामका राक्षस रहता था। वह बारी-बारीसे पुरुषोंको मारकर खाता था॥ ६०–६२॥ जब कि ब्राह्मणके लड़केकी पारी आई तो ब्राह्मणने भूतोंकी शरणमे जाकर निवेदन किया, तब भूतोंने कहा कि तुम राक्षससे निवेदन करो, हमलोग उससे तुम्हारे पुत्रको बचा लेवेंगे। तब ब्राह्मणने अपने पुत्रको राक्षसको दे दिया पर भूतोंने उससे पुत्रको बचाकर एक पर्वतकी गुफामे रख दिया। वहाँ पर एक भूखे अजगरने उस लड़केको खा लिया॥ ६३–६४॥ इसलिए जो होना है वह कहीं पर रहो अवश्य होगा, अतएव शान्ति रखकर हम लोगोंको यहीं चुप बैठना चाहिये॥ ६५॥ तब मन्त्रियोंमें श्रेष्ठ मतिसागर नामके चौथे मन्त्रीने उन सब लोगोंके कहे हुएको विचार कर अपनी बुद्धिसे यों कहा कि—ज्योतिषीने तो केवल यह कहा है कि पोदनपुरके राजाके शिर पर वज्र गिरेगा। उसने नाम लेकर तो यह नहीं कहा कि श्रीविजयके शिर पर वज्र गिरेगा॥ ६६–६७॥ इसलिए इस नगरमें किसी अन्यका राज्याभिषेक कर दिया जाय और श्रीविजय राज्यका परित्याग कर सात दिन तक चैत्यमें निवास करें॥ ६८॥ इस पर सबने सहमति दे दी। फिर सभी प्रतिमागृहमे गये और वहाँ पर उन लोगोंने सोम, इन्द्र, वरुण, यम, रवि और वैश्रवणकी पूजा होती हुई देखी॥ ६९॥ अनन्तर सब लक्षणोंसे सम्पन्न कुबेरकी प्रतिमाको देखकर उन लोगोंने राजाके स्थान पर उसकी स्थापना की॥७०॥

फिर मुकुट और चामरयुक्त वैश्रवण महाराजकी सभी श्रेणीके लोग अपने-अपने नियोगके अनुसार सेवा करने लगे। राजा भी चार शरणोंको प्राप्त होकर जिनमन्दिरमे जा जिन भगवान्‌की पूजा करता हुआ रहने लगा, तथा नगरमे भी पूजा आदि शान्ति कर्मों

दानोपवासयुक्तो गृहे गृहे पुरजनोऽपि तद्भक्त्या ।
जिनपूजामारेभे श्रीविजयप्रातिहार्य्यार्थम् ॥ ७३ ॥

मेघाः प्रादुरभूवंस्ततः षड्दिनान्यतिगमय्य ।
अम्बरमावृण्वन्त्यो धारा विद्युत्स्तनितवत्यः ॥ ७४ ॥

वृष्ट्योऽथ महावर्षिदिवाशनिर्घोरभीमरवयुक्ता ।
वैश्रवणमस्तके सा शतधा निपपात भिन्दाना ॥ ७५ ॥

दृष्ट्वाशनिं निपतितां तदोपरि स्थापना नरेन्द्रस्य ।
श्रीविजयो जीव्यादित्युत्कृष्टं नरगणैस्तुष्टैः ॥ ७६ ॥

कृत्वाऽस्य मृतकपूजां राजा नैमित्तिकं समाहूय ।
कुम्भाष्टसहस्रेण स्नपयित्वा सपरिषत्क ॥ ७७ ॥

आभरणवस्त्रचूर्णकविमिश्रिता रत्नकुसुमवसुधाराम् ।
तन्मस्तकेऽतिमात्रां प्रपात्य वरकनकवृष्टिञ्च ॥ ७८ ॥

सार्धं ग्रामशतेन प्रददौ तस्मै च पद्मिनीखेटम् ।
युवराजमन्त्र्यमात्यपुरपूजितश्चागमद्विप्रः ॥ ७९ ॥

श्रीविजयोऽप्यभिषेकं व्यपेतपीढः पुनश्च सम्प्राप्य ।
अददात्सुमहद्वित्तं मन्त्रिप्रियपृच्छकेभ्यश्च ॥ ८० ॥

इति शान्तिचरिते पुराणसंग्रहे आर्यावद्धे दामनन्द्याचार्यकृतौ
श्रीविजयकाण्ड नाम प्रथमः सर्गः समाप्तः ॥

———

की घोषणा कर दी गई ।। ७१-७२ ।। उसकी भक्तिसे नगरवासी जन भी श्रीविजयकी शुभ कामनाके लिए दान तथा उपवास पूर्वक पूजा करने लगे । छह दिन बीतनेके बाद उपद्रवकारी मेघ आकाश में घिरने लगे, और विजलीकी कड़कड़ाहट पूर्वक मूसलाधार वर्षा होने लगी । उस महावृष्टिके बाद भयंकर शब्द करता हुआ एक वज्र उस कुबेरकी प्रतिमा पर गिरा जिससे वह सौ टुकड़े हो गई ।। ७३-७५ ।। उस मूर्तिके ऊपर वज्रको गिरा हुआ देखकर सन्तुष्ट मनुष्योंने श्रीविजयकी जय बोली । फिर उस मृतक प्रतिमाकी सत्कारपूर्वक अन्त्येष्टि कर राजाने नैमित्तिकको बुलाया और उसका एक हजार आठ कलशोंसे अभिषेक किया ।।७६-७७।। तथा नाना प्रकारके वस्त्र, आभूषणोंको प्रदान कर उसके शिर पर सुवर्णरत्न और पुष्पोंकी वृष्टि की ।।७८।। तथा उसे सौ गाँवके साथ पद्मिनी खेट भेंटमें दिया । वह विप्र भीयुवराज, मन्त्री और अमात्य तथा पुरवासी लोगोंसे पूजित हो वहाँसे चला गया । अनन्तर सब लोगोंने श्रीविजयका फिरसे राज्याभिषेक किया और राजाने भी अपने मन्त्रियों और प्रेमियोंको खूब धन दान दिया ।।७९-८०।।

इस प्रकार पुराणसारसंग्रहके शान्तिनाथचरितमें श्रीविजयकाण्ड नामक प्रथम सर्ग समाप्त हुआ ।

द्वितीयः सर्गः

विज्ञापितोऽथ राजा सुतारया सोऽन्यदा तया सार्धम् ।
प्रियया परिचितपूर्वं ज्योतिर्वनमागतो द्रष्टुम् ॥ १ ॥

तस्मिन्विहृत्य देवी क्रीडाश्रान्ता शिलातलनिविष्टा ।
मृगमभिरूपं दृष्ट्वा प्रियमवदत्पश्य पश्येति ॥ २ ॥

ज्ञात्वानुभावमस्या मृगं ग्रहीतुं शनैरनुदधाव ।
गत्वा काञ्चिद्दिशं सोऽपि मृगोऽदृश्यतामगमत् ॥ ३ ॥

व्यर्थश्रम सलज्जो राजाऽप्यशृणोदितः करुणशब्दम् ।
हा नाथ कुतोऽसि गतः कुक्कुटसर्पेण दष्टेति ॥ ४ ॥

श्रुत्वा मा भैषीरिति वेगेनागत्य नरपतिः कान्ताम् ।
दृष्ट्वोरगापराद्धां विषघातमपनेतुमारेभे ॥ ५ ॥

मन्त्रौषधैरवार्यं विषमिषुवत्प्राप्ता सा मण्डलेशम् ।
राजाऽपि विषशान्तां ज्ञात्वा प्रियया सह मुमूर्षुः ॥ ६ ॥

कृत्वोरुदारनिचयं प्रिये गमिष्यसि मया विना क्वेति ।
उक्त्वाऽरुरोह चितिकां कान्तामुपगुह्य दत्ताग्निः ॥ ७ ॥

पोदनपुरेऽप्यभूवन्राजभयनिवेदका महोत्पाताः ।
दृष्ट्वा जातभयं क्षुभितं सान्त.पुरं नगरम् ॥ ८ ॥

द्वितीय सर्ग

एक समय माताका आदेश पाकर श्रीविजय अपनी प्रिया सुताराके साथ क्रीडा करनेके लिए पूर्व परिचित ज्योतिर्वनमे गया ॥ १ ॥ वहाँ पर विहार करती हुई वह सुतारा थककर एक शिला पर बैठ गई और वहाँ एक सुन्दर मृगको देखकर अपने प्रियसे कहने लगी कि देखो, उस मृगको देखो । राजा भी अपनी रानीकी इच्छा जानकर उस मृगको पकड़नेके लिए चुपके-चुपके उसके पीछे दौड़ा । वह मृग भी एक ओर जाकर अदृश्य हो गया । राजा भी विफल हो लज्जा सहित लौट ही रहा था कि उसने एक करुण शब्द सुना कि हे नाथ ! तुम कहाँ चले गये हो, मुझे कुक्कुट सर्प ने डस लिया है ॥ २-४ ॥

यह सुन राजा बहुत शीघ्र वहाँ आया और स्त्रीसे कहने लगा कि डरो मत । उसने सर्पसे डसी हुई उसे जानकर विष दूर करनेवाले अनेक उपचार किये, किन्तु उसका विष मन्त्र और औषधिसे अवार्य था । वह लकड़ीके कुन्देके समान राजाकी गोदमें आ पड़ी । राजा भी उसे मरी जान उसके साथ मरनेको तैयार हो गया तथा रोकर कहने लगा, कि हे प्रिये ! मुझे छोड़ कहाँ जा रही हो, यह कह उसने वहाँ एक चिता बनायी और आग लगाकर उसके साथ चिता पर जा बैठा ॥ ५-७ ॥ पोदनपुरमे भी राजाके अनिष्टसूचक बहुतसे उत्पात हुए । यह देख तमाम रनवास और नगर क्षुभित हो गया । इससे वह ब्राह्मण भी तेज घोड़ोंवाले रथ पर चढ़कर शीघ्र ही राजमहलमे आया और विजयको, राजाकी माँको तथा

वरतुरगसम्प्रयुक्तं रथमारुह्याऽगमद् द्विजः शीघ्रम् ।
मा भैष्टेति वदंस्ताान्विजयं जननी पुरजनञ्च ॥ ९ ॥

कृतविनयः कृतविनयानमोघजिह्वोऽवदच्छृणुत राजा ।
प्राप्तस्सन्देहमुरुं किंपुनरारोग्यमीशस्य ॥ १० ॥

अचिरादेव च राज्ञः प्रवृत्तिरायास्यतीति निर्दिष्टे ।
तत्समयेऽम्बरशिखरे ददृशुर्विद्याधरयुवानम् ॥ ११ ॥

अवतीर्याऽसौ गगनात्कृतोपचारः स्म वदति नृपजननीम् ।
श्रीविजयभद्रपार्श्वादायामि सम्प्रहितोऽहमिति ॥ १२ ॥

सम्भिन्नो मे जनको नाम्ना माता च सर्वकल्याणी ।
दीपशिखो नाम्नाऽहं खचरो ज्योतिःपुरनिवासी ॥ १३ ॥

उद्यानगमनहेतोराहूतावमिततेजसा चावाम् ।
अगमाव पितापुत्रौ शिखरितलं ख्यातमुद्यानम् ॥ १४ ॥

तस्मान्निवर्तमानौ खे यानविमानकेऽशृणुव शब्दम् ।
हाऽमिततेजः श्रीविजयेति स्त्रीक्रन्दितं करुणम् ॥ १५ ॥

श्रुत्वा नामग्रहणं कस्त्वं कां हरसि कुत्र चेत्युच्चैः ।
उद्गीर्णखड्गचापौ तर्जन्तौ तत्पुरो यातौ ॥ १६ ॥

प्रोतस्थे तच्छब्दादिन्द्राशनिसूनुरहमिति प्रगदन् ।
मामासुर्यास्तनयं न वित्थ किं भो अशनिघोषम् ॥ १७ ॥

एषा मया सुतारा ह्रियते श्रीविजयराजपत्नीति ।
आवाभ्यामारेभे खे योद्धुं चमरचञ्चेशः ॥ १८ ॥

दृष्ट्वा तु तौ प्रयुद्धौस्तुष्टाऽगदीद्वो विमानकान्तःस्था ।
मा युत्सातां तातौ यातां ज्योतिर्वनं शीघ्रम् ॥ १९ ॥

पुरवासियोंको भय मत करो इस प्रकार सान्त्वना देने लगा ॥ ८-९ ॥ अमोघजिह्व निमित्तज्ञानीने विनयपूर्वक यह पूछे जाने पर कि राजाका क्या हाल है—उत्तरमे नम्रतापूर्वक कहा कि राजा को एक बड़ा भय उत्पन्न हो गया है। फिर उसके आरोग्यके विषय मे तो कहना ही क्या है पर शीघ्र ही उनकी राजी-खुशीका समाचार आवेगा। ऐसा कहते समय ही उन सब लोगोंने आकाशसे उतरते हुए एक नवयुवकको देखा। आकाशसे उतरकर उसने अभिवादनपूर्वक राजाकी मातासे कहा कि श्रीविजयके पाससे उनका भेजा हुआ आ रहा हूं। मेरे पिताका नाम संभिन्न और माताका नाम सर्वकल्याणी है। ज्योतिःपुर निवासी, मैं उनका पुत्र दीपशिख हूं ॥ १०-१३ ॥ रथनूपुरके राजा अमिततेजके साथ उनके आमन्त्रण पर हम दोनों पिता-पुत्र उद्यान विहार करनेके लिए शिखरितल नामके प्रसिद्ध उद्यानमे गये थे। वहाँसे जब हम लौट रहे थे तो आकाशमें एक विमानमे हा अमिततेज, हा श्री-विजय इत्यादि करुणा भरे शब्द कहते हुए एक स्त्रीके रोनेकी ध्वनि सुनी। ॥ १४-१५ ॥ इन नामोको सुनकर हमलोग वहाँ गये और उस विद्याधर से पूछा कि तुम कौन हो और किसको हरण किये जा रहे हो ? तथा इसे कहाँ लिये जा रहे हो ? इस तरह हमलोग उसके ऊपर खड्ग तान कर तर्जना करते हुए उसके सामने खड़े हो गये। इन शब्दोको सुन मैं इन्द्राशनिका पुत्र हूँ, ऐसा कहता हुआ वह खड़ा हो गया और बोला कि क्या तुम आसुरीका पुत्र मुझ अशनिघोषको नहीं जानते ? मैं श्रीविजयकी राजपत्नी सुतारा को हरण कर लिये जा रहा हूं। जिसमें ताकत हो आवे छुड़ा ले। इस प्रकार कहता हुआ वह चमरचञ्चपुरका राजा हम लोगोंके साथ आकाशमे युद्ध करनेके लिए तैयार हो गया ॥ १६-१८ ॥ हे माताजी ! हम लोगोंको युद्ध करता हुआ देखकर विमानके भीतर

वैतालविद्यया मे नाथः व्यपहृते विमोह्यासौ ।
तं मोचयतां मरणात्कृताञ्जलिस्त्वामहं याचे ॥ २० ॥

इत्युक्तं श्रुत्वाऽऽवामागस्याद्रक्षाव चितकमध्यस्थम् ।
राजानं विलपन्तं मोहाद्वैतालमुपगुह्य ॥ २१ ॥

मत्पितृमन्त्रविनष्टा विद्या राजातिविस्मितः किमपि ।
अभिनन्द्याऽशीर्वादे राज्ञेऽकथयाव तत्सर्वम् ॥ २२ ॥

श्रुत्वाऽशनिघोषकृतं राज्ञा सम्प्रेपितोऽहमायातः ।
त्वरया नृपसन्देशं हृतां सुताराञ्च वक्तुं वः ॥ २३ ॥

श्रुत्वा तन्नृपजननी दूत नैमित्तिकञ्च सम्पूज्य ।
युवराजदूतसहिता प्रगता ज्योतिर्वनं शीघ्रम् ॥ २४ ॥

दृष्ट्वा जननीं राजा प्रणनाम कृतान्जलिः समुत्थाय ।
आश्लिष्य साश्रुनयना साशीर्वादं सुखमपृच्छत् ॥ २५ ॥

तस्मात्सर्वे गत्वा रथनूपुरममिततेजसे प्रोचुः ।
श्रुत्वा भगिनीहरणं सोऽशनिघोषाय चुक्रुद्ध ॥ २६ ॥

सम्मन्त्र्य दूतमेकं सम्प्रेपयति स्म चमरचञ्चपुरे ।
सोऽपि त्वरया गत्वा न्यवर्तताविमानितस्तेन ॥ २७ ॥

श्रुत्वा स्वदूतवाक्यं ज्ञात्वा माहात्म्यमशनिघोपस्य ।
श्रीविजयाय खगेन्द्रो विद्ये द्वे साधयेति ददौ ॥ २८ ॥

प्रहरणावरणीं दिवसैः सप्तभिर्बन्धमोचनीं च तथा ।
संसाध्य सिद्धविद्यो योद्धुमयादशनिघोपेण ॥ २९ ॥

बैठी हुई आपकी पुत्रवधूने कहा कि अभी युद्ध मत कीजिए बल्कि ज्योतिर्वन मे जाकर वेतालिनी विद्यासे ठगे गये मेरे पतिको मरने से बचाइए। मैं हाथ जोड़कर आपसे यही प्रार्थना करती हूँ ॥ १९-२० ॥

यह सुनकर हम लोग ज्योतिर्वन मे शीघ्र आये और वहाँ जलती हुई चिता के बीच मे बैठे हुए तथा मोहवश वैताली विद्या के बनावटी रूप से लिपटे हुए, विलाप करते हुए राजा को देखा ॥२१॥ मेरे पिता के मंत्र बल से वह विद्या नष्ट हो गई, तब राजा ने चकित हो आशीर्वाद पूर्वक हम लोगों का अभिनन्दन किया। हम लोगोंने भी राजा को सब वृत्तान्त सुनाया ॥२२॥ अशनिघोषके कृत्यको सुनकर राजाने मुझे आप लोगों के पास खबर देनेको भेजा, जिससे मैं राजाका सन्देश तथा सुताराके हरण किये जानेका समाचार कहनेके लिए आप लोगों के पास आया हूँ ॥२३॥ यह सब सुन राजमाता, उस दूत और ज्योतिषीको बहुत सम्मानित कर युवराज और दूत सहित स्वयं ज्योतिर्वनमे गईं। माताको देख राजाने हाथ जोड़ खड़े होकर प्रणाम किया। उस माताने भी सजलनेत्र हो पुत्र का आलिगन कर आशीर्वाद दिया और सुख वार्ता पूछी ॥ २४ ॥ २५ ॥ तब सभी रथनूपुर गये और अमित-तेजसे सारा वृत्तान्त कहा। उसने अपनी बहिन का हरण सुन अशनिघोष पर अत्यन्त क्रोध किया, और मंत्रियोंसे सलाह कर चमरचञ्च नगर, अशनिघोषके पास एक दूत भेजा। अशनिघोशने उसके दूतको अपमानित कर लौटा दिया ॥ २६-२७ ॥ अमिततेजने अपने दूतके वचनोंको सुन तथा अशनिघोषके माहात्म्यको जानकर श्री विजयको दो विद्याएँ साधनेके लिये दीं। उसने सात दिनमे प्रहरणावरणी और बन्धमोचनी इन दोनो विद्याओंको साध लिया तथा अशनिघोषसे युद्ध करनेके लिये निकल पड़ा ॥ २८-२९ ॥

भान्वर्कचन्द्ररविशशिमितादिरथसेनकीर्त्तिगतितेज. ।
वेगोत्तरनामाद्या. पञ्चशतं सूनवोऽप्यगमन् ॥ ३० ॥

सम्प्रेष्याऽमिततेजा ह्रीमन्तं शैलमाययौ पश्चात् ।
साधयितुमना विद्या प्रतिमामूले जयन्तस्य ॥ ३१ ॥

नाम्ना सहस्ररश्मिर्ज्येष्ठसुतस्तं ररक्ष सन्नह्य ।
साधयमान यत्नाच्छेदकरीं सर्वविद्यानाम् ॥ ३२ ॥

श्रीविजयः स्वश्रिया सहितः प्रापदुत्तरश्रेणीम् ।
श्रुत्वाऽशनिघोषस्तं पुत्रान्सम्प्रेषयामास ॥ ३३ ॥

विद्युत्सहस्रशतमेघसिंहघोषान्तनामकादीनाम् ।
त्रीणि शतानि सुतानां निर्जग्मुर्योद्धुमेकदैव ॥ ३४ ॥

तेऽमिततेजोऽशनिघोषसुता मायाविनोऽम्बरे बहुधा ।
अन्योऽन्यं प्रहरन्तो विद्याभिर्युयुधिरे पक्षम् ॥ ३५ ॥

भग्नास्ततोऽशनिसुता अभिभूता अमिततेजस. पुत्रैः ।
दृष्ट्वाऽशनिघोषस्तान् सबलो योद्धुं निरैत् क्रुद्धः ॥ ३६ ॥

श्रीविजयसेनप्रहतो मायावी क्वापि बभूव सच्छिन्नम् ।
प्रहतः पुनः पुनरसौ द्विगुणो द्विगुणः परावृत्त ॥ ३७ ॥

भूत्वाऽशनिघोषसहस्राणि बहूनि युयुधिरे दिशो व्याप्य ।
श्रीविजयेनाऽमिततेजसश्च पुत्रैः पुनः पक्षम् ॥ ३८ ॥

सम्प्राप्तऽमिततेजस्तत्काले सिद्धविद्यकस्तत्र ।
दृष्ट्वाऽशनिघोषोऽभिपलायाम्बभूव तदा ॥ ३९ ॥

दृष्ट्वा पलायमान मुमोच विद्याममुं गृहाणेति ।
स तयाऽभिव्याप्यमानः क्वे शरणं न क्वचिल्लेभे ॥ ४० ॥

तथा भानु, अर्क, चन्द्र, रवि, शशि और मित है आदिमें जिनके तथा रथ, सेन, कीर्ति, गति, तेज और वेग है अन्तमें जिनके ऐसे नामवाले पाँचसौ पुत्र भी उनके साथ गये ॥ ३० ॥ इन सबको भेजकर अमिततेज स्वयं महाज्वाला नामकी विद्याको सिद्ध करनेके लिये ह्रीमन्त पर्वत पर सञ्जयन्त मुनिकी प्रतिमाके पास गया। वह विद्या सर्व विद्याओंको नष्ट कर देनेवाली थी। उसे यत्न पूर्वक सिद्ध करते समय ज्येष्ठ पुत्र सहस्ररश्मि सावधान हो उसकी रक्षा करने लगा ॥ ३१-३२ ॥ इधर श्रीविजय अपनी विभूतिके साथ उत्तरश्रेणिको प्राप्त हुआ। यह सुन अशनिघोषने सेनासहित विद्युत्घोष, सहस्रघोष, शतघोष, मेघघोष, सिंहघोष आदि तीनसौ पुत्रोंको युद्ध करनेके लिए भेजा और वे सब एक साथ ही युद्धके लिए निकल पड़े। वे अमिततेज और अशनिघोषके मायावी पुत्र आकाशमे एक दूसरे पर विद्याओंका प्रयोग करते हुए एक पक्ष तक युद्ध करते रहे। इस वीच अमिततेजके पुत्रों द्वारा अशनिघोपके सभी पुत्र पराजित होकर छिन्न-भिन्न कर दिये गये। यह देख अतिक्रुद्ध अशनिघोष सेना सहित उनसे लड़नेके लिये निकल पड़ा ॥ ३३-३६ ॥ तव उससे लड़नेके लिये श्रीविजय आगे आया और उसके दो टुकडे करने ही चाहे थे पर वह मायावी विद्याके वलसे स्वयं दो टुकड़े हो गया, फिर भी श्रीविजयने दो टुकड़े करने चाहे इस पर वह अपना द्विगुणित रूप करता ही गया। इस तरह अशनिघोपने चारो ओर दिशाओंमें अपने हजारों रूप वनाकर श्रीविजय तथा अमिततेजके पुत्रोंके साथ पन्द्रह दिन तक युद्ध किया। उसी समय विद्याओंको सिद्ध कर अमिततेज आ गया तो उसको देखते ही अशनिघोप भाग उठा। उसको भागता देख उसे पकड़नेके लिये अमिततेजने अपनी विद्या भेजी। जिसका दवाव पड़नेके कारण वह कहीं भी शरण न पा सका ॥ ३७-४० ॥

नाभेयसीमनामनि केवलमुदपादि विजयभद्रस्य ।
तत्पूजनाय देवाश्चतुर्निकायाः समाजग्मुः ॥ ४१ ॥

समवशरणं तदानीं प्रविश्य गत्वा च भगवत. शरणम् ।
केवलिचरणसमीपे स्वस्थोऽभूदशनिघोषोऽत्र ॥ ४२ ॥

इतरेऽपि मुक्तवैराः श्रीविजयाद्या बभूवुरालोक्य ।
केवलिनं बलदेव प्रदक्षिणीकृत्य अनुतस्थुः ॥ ४३ ॥

शीलवतीमानीय सुतारान्तत्रैव चासुरी देवी ।
अर्पयति स्म नः पुत्रो नरप क्षम्यतां च सा प्रणता ॥ ४४ ॥

अथ ते सोदर्य्या इव भूत्वा सर्वेऽपि शुश्रुवुर्धर्मम् ।
केवलिमुखोद्गतं तं संसारसमुद्रनिस्तारम् ॥ ४५ ॥

पप्रच्छाऽमिततेजः कथान्तरे जातसंशयस्तत्र ।
केनेश कारणेनाहरत्सुतारामशनिघोषः ॥ ४६ ॥

इति पृष्ट. सोऽवोचद्भगवांस्तत्पूर्वजन्मसम्बन्धम् ॥
मगधेष्वचलग्रामे धरणीजटो नाम विप्रोऽभूत् ॥ ४७ ॥

तस्याऽग्निला च भार्या पुत्राविन्द्राग्निभूतिनामानौ ।
तत्प्रेषणिकापुत्रो मेधावी कपिलको नाम्ना ॥ ४८ ॥

कपिलोऽधीयानं ताभ्यां द्विजसूनुभ्यामधीत्य कर्णागतम् ।
भूत्वा वेदविदस्माद् दृष्टोऽसौ रत्नपुरमगमत् ॥ ४९ ॥

सत्यकनाम्नो भार्या जम्बूर्दुहिताऽस्य सत्यभामेति ।
तामददात्परितुष्टो विप्रः कपिलाय वेदविदे ॥ ५० ॥

उसी समय नाभेयसीम नामके पर्वत पर श्री विजयभद्र तीर्थङ्करको केवलज्ञान उत्पन्न हुआ था जिससे चारों प्रकारके देव उनकी पूजा करनेके लिये वहाँ आये थे ॥ ४१ ॥ उस अशनिघोषने भगवान्‌के समवशरणमें जाकर शरण पाई, और वहाँ निर्भय हो बैठ रहा। उसका पीछा करनेवाले दूसरे लोग श्रीविजय आदि भी केवलीकी प्रदक्षिणा कर वैर विरोध त्याग चुपचाप समवशरणमें बैठ गये। उसी समय आसुरी देवी भी शीलवती सुताराको लेकर वहाँ आई और अर्पण कर श्रीविजय तथा अमिततेजसे प्रणत होकर कहने लगी कि आप दोनोंको मेरे पुत्रका अपराध क्षमा कर देना चाहिये। इसके बाद वे सब गले मिले और सगे भाईयोंके समान बैठ, संसार समुद्रसे तारनेवाले केवलीके मुखसे निकले सद्धर्मका उपदेश सुनने लगे ॥ ४२–४५ ॥

इस कथाके प्रसंगमें संशय उत्पन्न होने पर अमिततेज विद्याधरने पूछा कि भगवन्! किस कारणसे अशनिघोषने सुताराका हरण किया था। इस पर भगवान्‌ने उनके पूर्वजन्मके सम्बन्ध बतलाये। उन्होंने कहा कि :—

मगधदेशके अचल ग्राममें धरणीजट नामका ब्राह्मण रहता था। उसके अग्निला नामकी भार्यासे इन्द्रभूति और अग्निभूति नामके दो पुत्र हुए। उसके पास कपिल नामका एक दासीपुत्र था जो कि बहुत बड़ा बुद्धिमान् था। जब वह धरणीजट अपने दोनों पुत्रोंको वेद पढ़ाता था तब उसे सुनकर वह कपिल भी याद कर लेता था इस तरह वह अच्छा वेदज्ञ हो गया। एक दिन धरणीजटने उसे वेदपाठ करते देख लिया तो उसे घरसे निकाल दिया। वहाँसे निकल वह रत्नसञ्चयपुर चला गया। वहाँ एक सत्यक नामका ब्राह्मण रहता था उसकी स्त्री जम्बूसे एक सत्यभामा नामकी पुत्री थी। कपिलकी विद्वत्तासे खुश हो उसने अपनी पुत्री-

श्रुत्वा तमुपाध्यार्यं बहुशिष्यं वेदपारगं कपिलम् ।
आगच्छद्धरणीजटो लोभान्मे पुत्र इति तत्र ॥ ५१ ॥

सम्पूज्य सत्यभामा श्वशुरं पप्रच्छ भर्तुर्वृत्तान्तम् ।
विप्रोऽप्युक्त्वा तस्यै लब्ध्वा द्रविणं गतो ग्रामम् ॥ ५२ ॥

अकुलीनं ज्ञात्वा तं शरणमगान्नरपतिं विरक्ता सा ।
कपिलमवोचद्राजा राज्यान्मे राज्यान्तरं याहि ॥ ५३ ॥

श्रीषेणो राजाऽस्मिन्ननिन्दितासिंहनन्दिते भार्ये ।
तस्येन्द्रनामा सुतः कनीयानुपेन्द्रोऽन्यः ॥ ५४ ॥

राजाऽन्यदा सदारोऽदात्सत्यभामया सहितः ।
अमितादित्यगतिभ्यां सप्तगुणं प्रासुकं भोज्यम् ॥ ५५ ॥

राज्ञः महाबलस्य श्रीमत्यां गर्भजा सुता नाम ।
श्रीकान्ता कौशाम्ब्यामानीता सेन्द्रसेनस्य ॥ ५६ ॥

अनुगामिनी च तस्या अनन्तमतिका बभूव गणिकैका ।
तद्धेतोर्नृपसुतयोः कलहोऽभूदेकदोद्याने ॥ ५७ ॥

दृष्ट्वा पुत्रविरोधं वारयितुमशक्नुवन्सभार्यः ।
आघ्राय स विषप्रसूनं राजा मृतः सत्यभामा च ॥ ५८ ॥

युद्धे ततः प्रवृत्ते सहसाऽकाशस्थितोऽब्रवीत् कश्चित् ।
मा स्म गणिकानिमित्तं युत्साथां वामियं भगिनी ॥ ५९ ॥

का विवाह उससे कर दिया। वेदपारंगत वह वहाँ अनेक शिष्योंका अध्यापक बनकर रहने लगा। यह सुन धरणीजट उसके पास आया और लोभबुद्धिसे लोगोसे यह मेरा पुत्र है कहकर वह भी उसके साथ रहने लगा ॥ ४६-५१ ॥

सत्यभामाने एक दिन अपने श्वसुरका बहुत सन्मान कर अपने पतिका वृत्तान्त पूछा। धरणीजट भी उससे सब भेद कहकर धन ले घर चला गया ॥ ५२ ॥ सत्यभामा कपिलको अकुलीन जान उससे विरक्त हो गई और राजाकी शरणमें गई। इस पर राजाने कपिलको अपने राज्यसे निकल जानेको कहा ॥५३॥ उस समय उस नगरका राजा श्रीषेण था उसकी अनिन्दिता और सिंहनन्दिता नामकी दो रानियाँ थीं तथा इन्द्रसेन और उपेन्द्र नामके दो पुत्र थे। किसी एक दिन अपनी रानियों और सत्यभामा सहित राजाने अमितगति एवं आदित्यगति नामके मुनि राजोंको दाताके सातों गुण सहित प्रासुक आहारदान दिया ॥ ५४-५५ ॥

इस राजाके समयमें कौशाम्बीमें भी महाबल नामका एक राजा रहता था। उसकी रानी श्रीमतीसे श्रीकान्ता नामकी एक पुत्री हुई। उसे उसने इस राजाके पुत्र इन्द्रसेनसे विवाह दी। उस पुत्रीकी सेविका अनन्तमती नामकी एक वेश्या थी जो उसके साथ आई थी। किसी समय उसके निमित्तसे उद्यानमें दोनों भाइयोमें युद्ध छिड़ गया। राजा दोनों पुत्रोंके विरोधको देखकर उस युद्धको बन्द करने गया पर बन्द न कर सका। इससे अतिदुखित हो दोनों स्त्रियोंके साथ विषपुष्पको सूँघकर वहीं मर गया। सत्यभामा भी विषपुष्प सूँघकर मर गई ॥ ५६-५८ ॥

जब कि युद्ध चल रहा था उसी बीच आकाशसे एक विद्याधरने कहा कि इस वेश्याके निमित्त तुम मत युद्ध करो यह तुम्हारी

आदित्याभं नगरं प्राच्ये भागेऽस्ति धातकीखण्डे ।
राजा सुकुण्डलीति च विजयार्द्धे पुष्कलावत्याम् ॥ ६० ॥

तस्य मित्रसेनाया नाम्ना मणिकुण्डली च पुत्रोऽहम् ।
अर्हन्तममितयशसं वन्दित्वा पुण्डरीकिण्याम् ॥ ६१ ॥

पूर्वभवं मेऽपृच्छम्भगवान् प्रोवाच पुष्करद्वीपे ।
अपरविदेहे चक्रध्वजो नृपोऽभूद्वीतशोकायाम् ॥ ६२ ॥

कनकश्रीरिति देवी कनकलताऽन्या च पद्मलतिका च ।
आस्तां हि सुते तस्या विद्युन्मत्याश्च पद्माऽन्या ॥ ६३ ॥

पार्श्वेऽमितसेनाया आर्याया. सम्प्रगृह्य कर्मगुणन् ।
उपवासमुपोष्येयु. सौधर्मं ताश्चतस्रोऽपि ॥ ६४ ॥

या कनकश्रीः साऽहमेते यद्दुहितरौ युवामिमकौ ।
या सनिदाना पद्मा सेयं गणिकेति बुध्येयाम् ॥ ६५ ॥

इति तद्वाक्यं श्रुत्वा त्यक्त्वा राज्यं सुधर्ममुनिपार्श्वे ।
कृत्वा सुतपः सम्यक् जीविताऽन्ते निर्वृतिमाप्तौ ॥ ६६ ॥

श्रीषेणसिंहनन्दे दानत्वात् प्रागुत्तरकुरुष्वास्ताम् ।
मिथुनं तद्देवकुरुष्वनिन्दिता सत्यभामा च ॥ ६७ ॥

पल्योपमानि भुक्त्वा त्रीण्युत्तमदानलब्धमुपभोगम् ।
सौधर्मकल्पमीयुरच्युत्वा तस्मादिहाऽभूवन् ॥ ६८ ॥

यः श्रीषेणो राजा सोऽमिततेजा अभूः खगेन्द्रस्त्वम् ।
या निन्दिता हि देवी सा श्रीविजयोऽभवत्पुण्यात् ॥ ६९ ॥

या तत्र सिंहनन्दा सेयं ज्योतिःप्रभाऽग्रमहिषी ते ।
या सा हि सत्यभामा सेयं भगिनी सुतारेति ॥ ७० ॥

बहिन है ॥ ५६ ॥ उन दोनोंने पूछा कि यह कैसे ? तब वह विद्याधर कहने लगा कि धातकीखण्ड द्वीपके पूर्व भागमे पुष्कलावती देशके विजयार्द्ध पर्वत पर आदित्याभ नामका नगर है। वहाँका राजा सुकुण्डली और उसकी रानी मित्रसेनासे मै मणिकुण्डली नामका पुत्र हुआ हूँ। किसी एक दिन मैं पुंडरीकिणी नगरी गया था और वहाँ अमितयश जिनेन्द्रकी वन्दना कर मैंने अपने पूर्व भव पूछे थे। इसके उत्तरमे भगवान्ने कहा था कि पुष्करार्ध द्वीपके पश्चिम विदेहमें वीतशोका नामकी नगरी है वहाँ चक्रध्वज नामका राजा राज्य करता था। उसकी पहली रानी कनकश्रीसे कनकलता और पद्मलता नामकी दो कन्यायें तथा दूसरी रानी विद्युन्मतीसे पद्मावती नामकी कन्या थी ॥६०-६३॥

किसी समय अमितसेना नामकी आर्यिकासे कर्मगुण व्रत उपवासादि धारण कर आयुके अन्तमे कनकश्री और तीनों कन्याएँ सौधर्म स्वर्ग गई ॥ ६४ ॥ वहाँसे च्युत हो कनकश्रीका जीव तो मैं मणिकुण्डल हुआ। कनकलता और पद्मलताके जीव तुम दोनों भाई तथा पूर्वजन्ममे खोटे निदानके कारण पद्मावतीका जीव यह गणिका हुआ है ॥ ६५ ॥ इन वचनों को सुनकर वे दोनो राज्यका त्याग कर विरक्त हो गये और सुधर्म मुनिके पास दीक्षा ले, तप कर जीवनके अन्तमे मोक्ष गये ॥६६॥

श्रीषेण और सिंहनन्दिता ये पूर्व उत्तरकुरुमे युगल हुए तथा अनिन्दिता और सत्यभामा ये देवकुरुमें युगलिया हुए और उत्तम दानके प्रभावसे प्राप्त उपभोगोंका तीन पल्य तक भोग किया। फिर वहाँसे च्युत हो सौधर्म स्वर्ग गये और वहाँसे यहाँ उत्पन्न हुए। श्रीषेणका जीव तो तुम अमिततेज विद्याधर हुए, अनिन्दिता देवीका जीव पुण्यसे श्रीविजय हुआ। सिन्हनन्दाका जीव तुम्हारी पट्टरानी ज्योतिःप्रभा हुई और सत्यभामाका जीव यह तेरी बहिन सुतारा हुई है ॥ ६७-७० ॥

सोऽस्या वियोगदुःखानि भुक्त्वा कपिलः परीत्य संसारे।
ऐरावत्यास्तीरे संभूतरमणके वने पश्चात् ॥ ७१॥

जातस्तापसाश्रमे कौशिकचपलात्मजो मृगश्रृङ्गः।
कुर्वन्बालतपोऽसौ दृष्ट्वाऽकाङ्क्षत्खगेन्द्रर्द्धिम् ॥ ७२ ॥

मृत्वेहाशनिघोषः संसाध्य भ्रामरीं महाविद्याम्।
आगच्छन् दृष्ट्वैनामाहरत्स्नेहेन पूर्वेण ॥ ७३ ॥

केवलिगदितं श्रुत्वा सर्वे वैरानुबन्धसम्बन्धम्।
प्रतिपेदिरेऽत्र नैर्ग्रन्थ्यमशनिघोषादयः केचित् ॥ ७४ ॥

देव्यः स्वयम्प्रभाद्याश्च दीक्षिताः काश्चिदेव निर्विण्णाः।
गृहधर्मरताः केचिद्बभूवुरुपलब्धसम्यक्त्वाः ॥ ७५ ॥

प्रगृहीतसुसम्यक्त्वौ श्रावकधर्मं प्रपद्य वन्दित्वा।
केवलिनं खगनरपौ ययतुः स्वं स्वं पुरं तुष्टौ ॥ ७६ ॥

शुच्यूर्जफाल्गुनेषु प्रतिवर्षे तौ प्रचक्रतुः महिमाम्।
अष्टाहमासभक्त्या स्नपनं सर्वेषु पर्वसु च ॥ ७७ ॥

मासोपवासतपसे दमवरसिंहाय प्रौषधं दत्त्वा।
प्रापद्वसुन्धराराध्यां खेचरसिंहः सुरैः पूजाम् ॥ ७८ ॥

प्रोषधयुक्तो राजा राजन्यश्चैत्यमण्डपे धर्मम्।
प्रोचेऽन्यदा समित्रस्तत्समये चारणौ प्राप्तौ ॥ ७९ ॥

तौ वन्दित्वोपनिषण्णौ चैत्ये तावमरदेवगुरुसंज्ञौ।
पूर्वभवं श्रीविजयोऽपृच्छत्कौतूहलात्स्वपितुः ॥ ८० ॥

उस कपिलके जीवने सत्यभामाके वियोगसे अनेक दुख सहते हुए संसारमे चक्कर लगाये फिर सम्भूतरमण नामके वनमे ऐरावती नदीके किनारे किसी तापसियोंके आश्रममे कौशिक तपसी और उसकी भार्या चपलवेगासे मृगश्रृङ्ग नामका पुत्र हुआ। बाल तप करते हुए वह विद्याधरोंकी विभूतिकी चाह करता हुआ मरा और यहाँ यह अशनिघोष विद्याधर हुआ। यहाँ इसने भ्रामरी विद्या सिद्ध की और रास्तेमे सुताराको देख पूर्वस्नेह के कारण इसे हरण कर लिया ॥ ७१–७३ ॥

केवली द्वारा कही गईं इन सब पूर्व जन्मके वैरसम्बन्धी बातों को सुनकर उनमेंसे अशनिघोष आदि कुछ लोगोने मुनि दीक्षा ले ली। स्त्रियोंमें से स्वयंप्रभादि कुछ देवियाँ विरक्त हो दीक्षित हो गईं तथा कुछ लोगोंने सम्यक्त्वपूर्वक अणुव्रतोंको धारण कर लिया। विद्याधरोंके राजा अमिततेजने और नराधिप श्रीविजयने दृढ सम्यक्त्वी हो श्रावकधर्म धारण किया और अतिप्रसन्न हो केवलीकी वन्दना कर अपने अपने नगरोंको लौट आये ॥७४–७६॥ और प्रतिवर्ष अषाढ़, कार्तिक और फाल्गुनके अष्टाह्निकाके दिनोंमे तथा अन्य सब पर्वोंमे वे दोनों भक्तिपूर्वक जिनेन्द्रकी पूजा अभिषेक करने लगे ॥ ७७ ॥ एक समय अमिततेजने एक माहका उपवास धारण करनेवाले दमवर नामके मुनिको आहार दान दिया इससे उसे देवताओं द्वारा जगत्मे प्रशंसनीय सन्मान प्रतिष्ठा मिली ॥ ७८ ॥

किसी समय प्रोषधव्रत धारण किये हुए राजा अमिततेज अपने मित्र श्रीविजयके साथ चैत्यालयमे अन्य राजाओके साथ धर्मचर्चा कर रहा था। उसी समय अमरगुरु और देवगुरु नामके दो चारण ऋद्धिधारी मुनि वहाँ आए। उन दोनोंने चैत्यालयमें विराजमान उन दोनों मुनिराजोंकी वन्दना की। इसके बाद

प्रथमानुयोगकुशलोऽमरगुरुसाधुर्जगाद राजगृहे ।
आस्तां च विश्वभूतिर्विशाखभूतिश्च राजानौ ॥ ८१ ॥

जैनी च विश्वभूतेः विशाखभूतेश्च लक्ष्मणा भार्या ।
क्रमशश्च विश्वनदी विशाखनन्दीति तत्पुत्रौ ॥ ८२ ॥

दत्त्वा राज्यं भ्रात्रे पुत्रं संस्थाप्य यौवराज्ये च ।
ज्यायांसं चतु.सहस्रै. श्रीधरपार्श्वे प्रवव्राज ॥ ८३ ॥

गत्वाऽऽम्रवनोद्याने क्रीडन्तं विश्वनन्दिनमुपायात् ।
अपनीय ततो राजा स्वसुतं प्रावेशयत्तत्र ॥ ८४ ॥

ज्ञात्वाऽथ विश्वनन्दी तत्कृतमुद्यानमागमद् द्रष्टुम् ।
प्रारेभे योद्धुं सः विद्राव्य विशाखभूतिसुतम् ॥ ८५ ॥

भङ्क्त्वा शैलस्तम्भं प्रपात्य तरसा कपित्थवृक्षं च ।
मात्रा प्रबोधितोऽसौ सम्भूताचार्यशिष्योऽभूत् ॥ ८६ ॥

वर्षशतसहस्रेण प्रापन्मथुरां तपश्चरन्नुग्रम् ।
तस्यां विशाखनन्दी जहास दृष्ट्वा गवा प्रहतम् ॥ ८७ ॥

तत्कारणान्निदानं कृत्वा देवोऽभवन्महाशुक्रे ।
अवतीर्येह महाबलविक्रमसत्त्वस्त्रिपृष्ठोऽभूत् ॥ ८८ ॥

यो विश्वभूतिरासीत्सोऽस्य बलदेव इह विजयाख्यः ।
योऽसौ विशाखनन्दी सोऽश्वग्रीवोऽभवच्छत्रुः ॥ ८९ ॥

श्रुत्वा पितृद्धिमुर्वां निदानमकरोत्त्रिगारवे सक्तः ।
चन्दनवनं खगेन्द्रः सश्रीविजयोऽगमद् द्रष्टुम् ॥ ९० ॥

विपुलमतिं विमलमतिं च चारणौ सम्प्रवन्द्य पप्रच्छ ।
आयुस्ताभ्यामुक्तं दिवसाः षड्विंशतिश्चेह ॥ ९१ ॥

श्रीविजयने कौतूहलवश अपने पिताके पूर्व भव पूछे ॥ ७६-८० ॥ प्रथमानुयोगमें प्रवीण साधु अमरगुरुने कहा कि राजगृहमें विश्वभूति और विशाखभूति नामके दो राजा रहते थे ॥ ८१ ॥ राजा विश्वभूतिकी जैनी और विशाखभूतिकी लक्ष्मणा नामकी स्त्री थीं। उन दोनोंको क्रमशः विश्वनन्दि और विशाखनन्दि नामके दो पुत्र हुए। विश्वभूतिने अपने छोटे भाई विशाखभूतिको राज्य दे तथा यौवराज्यपद पर ज्येष्ठ पुत्रको रख, चार हजार राजाओंके साथ श्रीधर मुनिके पास दीक्षा ले ली ॥ ८२-८३ ॥

एक दिन आम्रवन नामके उद्यानमें विश्वनन्दी क्रीडा कर रहा था। पर छल पूर्वक राजा विशाखभूतिने उसे वहाँसे निकाल अपने पुत्रको वहाँ प्रवेश कराया। जब विश्वनन्दीको यह सब छल-कपट मालूम पड़ा तो वह देखनेके लिए उद्यानमें आया और विशाखभूतिके पुत्र विशाखनन्दिको वहाँसे भगाकर युद्ध करने लगा और पत्थरके खम्भेको तोड़ डाला तथा कैंतके वृक्षको वेगसे गिरा दिया। इसपर उसकी माँने सम्बोधित किया और वह सम्भूताचार्यका शिष्य हो गया ॥ ८४-८६ ॥ तथा उग्र तपश्चर्या करता हुआ एक हजार वर्षके बाद वह मथुरामें आया। वहाँ उसे गायके धक्कासे गिरा हुआ देखकर विशाखनन्दी उसकी हँसी करने लगा ॥ ८७ ॥ इससे वह निदान बंध कर मरा और महाशुक्र स्वर्गमें देव हुआ। और वहाँसे अवतीर्ण हो वह महाबली, पराक्रमी त्रिपृष्ठ हुआ ॥८८॥ है जो तुम्हारा पिता विश्वभूति था वह विजय नामका बलदेव हुआ है और जो विशाखनन्दी था वह अश्वग्रीव नामका शत्रु हुआ है ॥ ८९ ॥ श्री विजयके पिताकी बड़ी भारी ऋद्धिको सुनकर तीन गारवोंमें आसक्त खगेन्द्र असिततेजने निदान किया और श्रीविजयके साथ चन्दन वनको देखनेके लिए गया ॥ ९० ॥ वहाँ विपुलमति और विमलमति नामके दो चार ऋद्धिधारी मुनि-

राजोंको देखकर प्रणाम किया और अपनी आयुके सम्बन्धमे पूछा। तव उन महामुनिने कहा कि तुम्हारी आयु अव केवल २६ दिन शेष रह गई है ॥६१॥ इस पर दोनोंने अर्कतेज और श्रीदत्तको राज्य देकर निःशल्य हो विधिपूर्वक प्रायोपगमन संन्यास धारण किया तथा आनत स्वर्गमें देव हुए ॥ ६२ ॥

इस प्रकार दामनन्दी आचार्य द्वारा रचित आर्याबद्ध शान्तिपुराणमें
सुतारा प्रत्यानयन नाम द्वितीय सर्ग समाप्त

तृतीयः सर्गः

स्वर्गे नन्द्यावर्ते तौ प्राणतेऽभवतां सुरनायकौ ।
विंशत्यब्धिमितां भुक्त्वा भोगांस्तावच्युतौ ॥ १ ॥

जम्बूद्वीपविदेहे सीतादक्षिणे वत्सावत्याम् ।
राजा प्रभङ्करीनगर्या स्तिमितसागरो नाम्ना ॥ २ ॥

देव्यौ वसुन्धरेति च तस्याऽनुमतिश्च तत्सुतौ जातौ ।
अपराजितः स्वर्गेन्द्र. श्रीविजयोऽनन्तवीर्योऽस्य ॥ ३ ॥

संस्थाप्य सुतौ राजा स्वयम्प्रभजिनान्तिके प्रवव्राज ।
दृष्ट्वा नागेन्द्रर्द्धिं निदानकरणादभूद् धरणः ॥ ४ ॥

अकृतोपचाररोषाच्चारवपिशुनात्खगेन्द्रदूतोऽत्र ।
वर्वरीचिलातिके किल देये दूत्येत्य तौ ऊचे ॥ ५ ॥

श्रुत्वा तच्चिन्तयतोरुपस्थिता पूर्वजातिजा विद्या. ।
भूत्वा तौ वर्वरिकाचिलातिके मायया ययतुः ॥ ६ ॥ (१)

दृष्ट्वा दमितारिस्ते तुष्ट. कनकश्रियै ददावङ्ग· ।
वहुशो नाटकसन्धिष्वनन्तवीर्यं वभाषाते ॥ ७ ॥

तृतीय सर्ग

वहाँ श्रीविजयका जीव स्वस्तिक विमानमे मणिचूल नामका देव हुआ तथा नन्द्यावर्त विमानमे अमिततेजका जीव आदित्य-चूल नामका देव हुआ। वहाँ उन्होने बीस सागरकी आयु प्रमाण सुख भोगे। अनन्तर वहाँसे च्युत होकर जम्बूद्वीपके विदेह क्षेत्रमें सीता नदीके किनारे वत्सकावती देशमे प्रभंकरी नगरीके राजा स्तिमितसागरकी पहली रानी वसुन्धरासे अमिततेज का जीव अपराजित और दूसरी रानी अनुमतीसे श्रीविजयका जीव अनन्तवीर्य नामके पुत्र हुए ॥१-३॥ पुत्रोंके बड़े होनेपर राजा स्तिमितसागर पुत्रोको राज्य दे स्वयम्प्रभ जिनके पास दीक्षित हो गया और तप कालमें नागेन्द्रकी विभूतिको देख निदान पूर्वक मरण कर धरणेन्द्र हुआ ॥ ४ ॥

एक समय वे दोनों भाई नारद ऋषिके आनेपर उनका सत्कार न कर सके। इसलिए नारदने रुष्ट होकर दमितारि विद्याधरसे उनकी चुगली की। इसपर विद्याधरने एक दूत उन दोनों भाइयोंके पास भेजा। दूतने आकर उनसे कहा कि आप वर्वरी और चिलातिका नामकी दोनो नर्तकियाँ हमारे राजाको भेंट कर दीजिये ॥ ५ ॥

दूतकी यह बात सुन वे दोनो विचार करने लगे। उसी समय उनके पास पूर्व जन्मकी विद्याएँ आ उपस्थित हुईं। उन विद्याओंके प्रभावसे वे दोनो भाई वर्वरी और चिलातिकाका रूप धारण कर सुमन्दिरके राजा दमतारिके पास गये ॥ ६ ॥ दोनो नर्तकियोंका देख और प्रसन्न हो उस मूर्ख दमितारि राजाने उन्हे अपनी पुत्री

अनुरक्तां ज्ञात्वा तां प्रगृह्य यानेन गतौ श्रुत्वा ।
क्रुद्धः सबलो योद्धुं……………………॥ ८ ॥

……………………… .. ….. ……..
…… ……. ….. . ………. ….॥ ९ ॥

…. … .. .. …. … …… ………………
उत्पन्नं तत्समये सुरकम्पं केवलज्ञानम् ॥ १० ॥

अवतीर्य विमानात्ते प्रवन्द्य धर्मं च शुश्रुवुस्तत्र ।
कीर्तिधरं कनकश्रीः पूर्वभव दुःखिताऽपृच्छत् ॥ ११ ॥

केवल्युवाच तस्यै धातकीखण्डस्य पूर्वभागेऽभूत् ।
ऐरावतशङ्खपुरे श्रीदत्ता नाम दुर्गतिका ॥ १२ ॥

कुण्टी कुणिनिश्च पङ्गुः काणान्या कुष्ठिनी परा कुब्जा ।
निर्जननीनां षण्णामासीस्त्व पोषिका ज्येष्ठा ॥ १३ ॥

सर्वशैलनामगिरौ श्रुत्वा सर्वयशसो मुनेः पार्श्वे ।
समुपोष्य धर्मचक्रं दृष्ट्वेच्छः खेचरेन्द्रर्द्धिम् ॥ १४ ॥

जाता शक्रस्य त्वं मृत्वा विद्युत्प्रभेव वल्लभिका ।
अहमपि सुमन्दिरपुरे जयदेव्यां कनकपुञ्जस्य ॥ १५ ॥

पुत्रः कीर्तिधराऽख्यो नाम्ना मद्गेहिनी पवनवेगा ।
पुत्रो दमितारिरस्य मनको मन्दिरा वनिता ॥ १६ ॥

कनकश्रीके पास भेज दिया। वहाँ वे दोनो नाटक सन्धियोमे वहुत चार अनन्तवीर्यकी प्रशंसा करने लगे॥ ७॥ अनन्तर कनकश्री उसपर अनुरक्त हो गई है ऐसा जानकर वे दोनो उसे विमानसे ले भागे। यह सुन दमितारि अत्यन्त क्रुद्ध हुआ तथा सेना सहित युद्ध करनेके लिए गया। अन्तमे दमितारिने चक्र लेकर अनन्तवीर्य पर चलाया परन्तु वह चक्र उसकी तीन प्रदक्षिणा देकर दाहिने हाथके पास आ ठहरा। भावी नारायण अनन्तवीर्यने उसी चक्रसे दमितारिको मार गिराया। इस प्रकार युद्धका अन्त कर वे दोनो भाई आकाश मार्गसे जा रहे थे कि उनका विमान आकाश मार्गमे रुक गया। वहाँ पर दमितारिके पिता कीर्तिधरको देवोंके आसनको कपानेवाला केवलज्ञान उत्पन्न हुआ है यह जान॥ ८-१०॥ वे लोग विमानसे उतर कर समवशरणमें गये और उनको प्रणाम कर धर्मोपदेश सुना। वहाँ पिताकी मृत्युसे दुखित कनकश्रीने अपने पूर्वभव पूछे॥ ११॥ केवलीने उत्तरमे कहा कि तुम पिछले तीसरे भवमे धातकीखण्ड द्वीपकी पूर्व दिशामे ऐरावत क्षेत्रके शंखपुर नगरमें एक वैश्यकी श्रीदत्ता नामकी बड़ी पुत्री थीं। तुम्हारी और भी छोटी बहिने थीं जो कुण्टी, कुणिनि, पङ्गु, काणी, कुष्ठिनी तथा कुब्जा थीं जिनकी बड़ी दुर्गति थी। इन सब माँ विहीन बहिनोंकी ज्येष्ठा होनेके कारण तुम्हीं पोषिका थीं॥१२-१३॥ एक समय सर्वशैल नामके पर्वत पर सर्वयश नामके मुनिसे धर्मोपदेश सुनकर तूने धर्मचक्र व्रतोपवास किया। तथा विद्याधर राजाकी ऋद्धिको देख-कर उसकी कामना की। जिससे मर कर तू सौधर्म इन्द्रकी विजली-की कान्तिके समान कान्तिवाली देवी हुई। मैं भी सुमन्दिरपुरमे राजा कनकपुंज और रानी जयदेवसे कीर्तिधर नामका पुत्र हुआ। मेरी पत्नीका नाम पवनवेगा था तथा तेरा पिता दमितारि मेरा पुत्र है और उसकी पत्नीका नाम मन्दिरा है॥ १४-१६॥

शान्तिकरस्य सकाशे प्रदीक्ष्य वर्षं स्थितस्य मे प्रतिमाम् ।
अष्टार्द्धकर्मनाशादुत्पन्नं केवलज्ञानम् ॥ १७ ॥

प्रतिलभ्य सुव्रतायां विचिकित्सां कृतवती तदा यस्मात् ।
तस्माद् बन्धुवियोगं ननु प्राप्तासि गुरुदुःखा ॥ १८ ॥

श्रुत्वा प्रदक्षिणं त कृत्वा निर्विण्णया सहागत्य ।
ददृशुरनन्तसेनं पुरि खचरैर्युद्ध्यमानं तौ ॥ १९ ॥

विद्युद्दंष्ट्रसुघोषौ प्रतिशत्रुसुतौ निहत्य वेगेन ।
हलधरचक्रधरत्वं तौ प्राप्यारेमतुर्महितौ ॥ २० ॥

कन्याचतुःसहस्रैः सह कनकश्रीः स्वयम्प्रभार्हन्तम् ।
शरणं प्रपद्य कृत्वा सुतपोऽन्ते कल्पमादिमं प्राप्ता ॥ २१ ॥

भार्या विजया हलिनो दुहिता सुमतिः प्रपूज्य जिनचैत्यम् ।
प्रददौ मुनये दानं तस्मान्निपपात वसुधारा ॥ २२ ॥

तुष्टौ हलचक्रधराविहानन्देन मन्त्रिणा चोक्तौ ।
तस्या. स्वयंवरार्थं व्याहरतां तौ नृपान् सर्वान् ॥ २३ ॥

कन्या शतपरिवारा शिविकामारुह्य सिद्धसेनेन ।
प्रविवेश नारपत्यं विमानमायाद्देविका तस्मिन् ॥ २४ ॥

बुध्यस्व धनश्रीरिति दिवि तां निजगाद नवमिका देवी ।
पुष्करभारतवास्ये नन्दनपुर्यमितविक्रमस्य ॥ २५ ॥

मैंने शान्तिकर मुनिराजके पास दीक्षा ले एक वर्ष तक प्रतिमा योग धारण कर चतुर्घातिया कर्मोंका नाश किया और केवलज्ञान प्राप्त किया है ॥ १७ ॥ तुमने पूर्व जन्ममें सुव्रता नामकी आर्यिका-को प्राप्त कर उनके प्रति ग्लानि की थी इसलिए तुम्हें अपने बन्धुओं का बड़े कष्टके साथ वियोग सहना पड़ा ॥ १८ ॥

यह सब सुन उन लोगोने केवलीकी प्रदक्षिणा की और उदासीन उस कनकश्रीके साथ अपने नगरको लौट आये। लौटते समय उन लोगोंने देखा कि नगरमे मेरा पुत्र अनन्तसेन विद्याधरोंके साथ युद्ध कर रहा है। तब उन्होंने उनके मुखिया दमितारिके पुत्र विद्यु-द्दंष्ट्र और सुघोषको शीघ्रतापूर्वक मार डाला। इसके बाद वे दोनों अपराजित और अनन्तवीर्य हलधर और चक्रधरका पद पा आनन्द करने लगे। कनकश्रीने चार हजार कन्याओंके साथ स्वयं-प्रभ जिनेन्द्रकी शरण जा दीक्षा ले ली और तप करके प्रथम स्वर्गमे देव हुई ॥ १९–२१ ॥

एक समय बलदेवकी पत्नी विजया और पुत्री सुमतिने जिन चैत्यकी पूजाकर दमवर मुनिराजको आहार दान दिया इससे उसके फलस्वरूप पञ्चाश्चर्यकी वृष्टि हुई ॥ २२ ॥ एक दिन बलभद्र और नारायण अत्यन्त प्रसन्न थे यह देख आनन्द मन्त्रीने उनसे निवेदन किया। तब उन्होंने कन्याके स्वयंवरके हेतु सभी राजाओंको आमन्त्रित किया ॥ २३ ॥ सौ सखियोसे घिरी हुई उस कन्याने पालकी पर आरूढ़ हो सिद्धसेन प्रतिहारीके साथ स्वयंवर-मण्डप मे प्रवेश किया। उसी समय वहाँ एक विमान आया जिसमें एक देवी बैठी थी और उसका नाम नवमिका था। आकाशमें ठहर कर ही उसने कहा कि तुम अपनेको धनश्री समझो। हम दोनों पुष्करार्ध द्वीपके भरतक्षेत्रमें नन्दन नगरके राजा अमित-विक्रम और रानी अनन्तमतीके अनन्तश्री और धनश्री नामकी दो

आवामनन्तमत्याश्चानन्तश्रीधनश्रियावास्ताम् ।
सिद्धगिरौ नन्दनर्षि नत्वा प्रोषधमगृह्णीव ॥ २६ ॥

त्रिपुराधिपवज्राङ्गदविद्याधरनामाशोकवनिकायाम् ।
अहरच्च वज्रमालिन्याकाशे त्याजिते पतिते ॥ २७ ॥

तेनाऽपि पर्णलघ्वीविद्या सक्रामिता तया शनकैः ।
वेणुवने सरःपार्श्वे भीमाटव्यामपप्लाव ॥ २८ ॥

प्रत्याख्याय च तस्मिन् मृत्वा शक्रस्य नवमिका चाहम् ।
जाता वैश्रवणस्य त्वमग्रमहिषी रतिर्नाम्ना ॥ २९ ॥

नन्दीश्वरयात्रायां धृतिवरचारणवचो जन्मनीत ।
सेत्स्यथ तुर्ये स्मृत्वा स्थित्या तद्बोधनायायाम् ॥ ३० ॥

इत्युक्तं श्रुत्वा सुमूर्च्छ जातिस्मरं पुनर्लब्धा ।
विज्ञाप्य नृपसमूहं प्रपूजिता देवपत्नीभिः ॥ ३१ ॥

कन्या सप्तशतावृता प्राव्राजीत्सुव्रतार्यिकापार्श्वे ।
कृत्वोग्रतपः सम्यक् साऽन्ते प्रापानतं कल्पम् ॥ ३२ ॥

कालकृते चक्रधरे बलदेवोऽनन्तसेनमभिषिच्य ।
षोडशराजसहस्रैरदीक्षद् यशोधरसमीपे ॥ ३३ ॥

अवधिज्ञानं प्राप्य चक्रे रत्नावलिं तपश्चोग्रम् ।
आराध्य सिद्धशैले सम्प्रापत्सोऽच्युतेन्द्रत्वम् ॥ ३४ ॥

प्राक्कृतनिदानदोषादनन्तवीर्योऽप्यधोगतिमवाप ।
वर्षसहस्रैः षट्सप्ततिमिश्चैः निरयाद् विनिःसृत्य ॥ ३५ ॥

धरणेन्द्रबोधनादिह भारतविजयार्द्धगगननामपुरे ।
पुत्रोऽत्र मेघवाहनमालिन्योर्मेघनादाख्यः ॥ ३६ ॥

पुत्रियाँ थीं। किसी दिन हम दोनों सिद्धकूट चैत्यालयमें गई थीं, और वहाँ नन्दन नामके ऋषिसे प्रोपधव्रत लिये थे ॥ २४–२६ ॥ उस समय त्रिपुर नगरके राजा वज्रांगदने अशोकवाटिकामें हम दोनोंको हरण किया, किन्तु उसकी स्त्री वज्रमालिनीके भयसे उसने हम दोनोंको आकाशमें छोड़ दिया और साथ ही उसने पर्णलघ्वी विद्या भी दी जिससे हम दोनों भीम अटवीमें तालावके किनारे वासोंके वनमें धीरे-धीरे आ उतरीं ॥ २७–२८ ॥ वहाँ हम दोनोंने समाधिमरण धारण किया। मरकर मैं तो सौधर्म इन्द्रकी नवमिका देवी हुई हूँ और तू कुवेरकी रति नामकी मुख्य देवी हुई ॥ २९ ॥ एक समय हम दोनों नन्दीश्वरकी यात्रा करने गयी थीं। वहाँ पर धृतिवर नामके चारण मुनिसे पूछने पर कि हम लोगोंकी मुक्ति कव होगी, उन्होंने कहा था कि इस भवके वाद चौथे भवमें अवश्य मुक्ति होगी। यह वतलानेके लिए ही मैं यहाँ आई हुई हूँ। यह कथन सुन कन्याको जातिस्मरण हो आया और वह मूर्च्छित हो गई। अनन्तर उसके द्वारा नृप-समूहको वैराग्यकी सूचना देनेपर वह देवागनाओंके द्वारा पूजी गई। तत्पश्चात् वह सात सौ कन्याओंके साथ सुव्रता आर्यिकाके पास दीक्षित हो गई और उग्र तपकर अन्तमें आनत कल्पमें देव हुई ॥ ३०–३२ ॥

कुछ काल वाद अर्धचक्री अनन्तविजयकी मृत्युके बाद बलदेव अपराजितने राज्यपद पर अनन्तसेनका अभिषेक कर सोलह हजार राजाओंके साथ यशोधर मुनिराजके पास दीक्षा ले ली और अवधिज्ञानको प्राप्त कर उन्होंने रत्नावली नामक उग्र तप किया और सिद्धकूट पर्वत पर अन्तमें आराधना पूर्वक मरण कर अच्युतेन्द्र पद पाया ॥ ३३–३४ ॥ पहले किये गये निदानके कारण अनन्तवीर्य नरक गया और वहाँ ७६ हजार वर्ष तक दुख भोग कर वहाँसे निकला। उसे उसके पिताके जीव धरणेन्द्रने नरकमें

जाकर संबोधा था। इसलिए वहाँसे निकल कर इसी भरतक्षेत्रके विजयार्ध पर्वतकी गगनवल्लभपुरीमें राजा मेघवाहन और रानी मेघमालिनीसे मेघनाद नामका पुत्र हुआ ॥ ३५-३६ ॥ विद्याधरों-का स्वामी होनेके बाद एक समय वह मेरुकी वन्दना करने गया था उसी समय अपराजितका जीव अच्युतेन्द्र भी जिनालयकी वन्दना करनेके लिए आया था। तब उसने हे नरेन्द्र 'तुम प्रबुद्ध हो जाओ' यह कहकर सम्बोधित किया। तब वह देवगुरुके समीप दीक्षा लेकर उग्र तपमें स्थित हो रत्नावली नामके तपको तपने लगा। एक समय वह नन्दन नामक पर्वत पर प्रतिमा योगसे खड़ा था कि सुकण्ठने उसके ऊपर उपसर्ग किये। इससे अन्तमें वह समाधिमरणसे देह त्याग कर अच्युत स्वर्गका प्रतीन्द्र हुआ ॥ ३७-३९ ॥

इस प्रकार पुराणसारसंग्रह नामके महापुराणान्तर्गत शान्तिचरितमें अनन्तवीर्यकाण्ड नामक तृतीय सर्ग समाप्त हुआ।

चतुर्थः सर्गः

द्वाविंशत्यब्धिसमं कालं भुक्त्वोत्तमं सुरेन्द्रत्वम् ।
च्युत्वा जम्बूद्वीपे सीतायास्तटे मङ्गलावत्याम् ॥ १ ॥

प्राग्रत्नसञ्चयेऽभूत् क्षेमङ्करकनकचित्रयोः पुत्रः ।
वज्रायुधोऽथ नाम्ना भार्या लक्ष्मीमती तस्य ॥ २ ॥

तस्यामजनि सहस्रायुध इति नाम्ना प्रतीन्द्रोऽपि ।
तज्जाया श्रीषेणा तत्पुत्रः कनकशान्त इति ॥ ३ ॥

क्षेमङ्करं सभायामुपविष्टं पुत्रनप्तृकोपेतम् ।
ऐशानकल्पवासी वादेनोपस्थितो देवः ॥ ४ ॥

वज्रायुधेन देवः पराजितो नास्तिको नयज्ञेन ।
उपशाम्य चित्रचूलः प्रपूज्य जग्राह सम्यक्त्वम् ॥ ५ ॥

प्राप्तेऽन्यदा वसन्ते सुदर्शना प्रेषणेन धारिण्याः ।
व्यज्ञापयत्कुमारं सुररमणोद्यानगमनाय ॥ ६ ॥

प्रियदर्शनवाप्यन्तः क्रीडन्तं ससयुवतिशतसहितम् ।
पूर्वभवबद्धवैरो विद्युद्दंष्ट्रोऽसकौ दृष्ट्वा ॥ ७ ॥

प्रक्षिप्योपरि शैलं देवं बध्नाति नागपाशैः स्म ।
वज्रायुधोऽपि रुष्टो विभेद चिच्छेद तत्पाशान् ॥ ८ ॥

क्षेमङ्करोऽपि बुद्ध्वा लौकान्तिकदेवबोधनात्पुत्रम् ।
अभिषिच्योग्रतपःस्थः प्रापच्चार्हन्त्यमतिपूज्यः ॥ ९ ॥

चतुर्थ सर्ग

अपराजितका जीव जो कि इन्द्र हुआ था, २२ सागर आयु भोग वहाँसे च्युत हुआ और जम्बूद्वीपके पूर्व विदेह क्षेत्रमें सीता नदीके किनारे पर स्थित मंगलावती देशके रत्नसंचयपुर नगरमें राजा क्षेमंकर और रानी कनकचित्रासे वज्रायुध नामका पुत्र हुआ। उसकी भार्याका नाम लक्ष्मीमती था। तथा उन्हीं दोनोके अनन्तवीर्य प्रतीन्द्र-का जीव सहस्रायुध नामका पुत्र हुआ। उसकी पत्नी श्रीषेणा थी जिससे कनकशान्त नामका एक पुत्र हुआ ॥ १–३ ॥

एक समय क्षेमंकर अपने पुत्र और पौत्रोंके साथ सभामें बैठा था कि उसी समय ईशान स्वर्गका एक देव राज्य सभामें विवाद करनेके लिए आया। वाद-विवादमें नयशैली जाननेवाले वज्रायुधने उस नास्तिक देवको पराजित कर दिया। तब शान्त हो उस विचित्रचूल देवने उस राजाकी पूजा की और सम्यग्दर्शन ग्रहण कर लिया ॥ ४–५ ॥

किसी दूसरे समय वसन्तऋतुमें उसकी धारणी आदि रानियों के सन्देशवश सुदर्शनाने वज्रायुधकुमारको सुररमण उद्यानमें चलनेके लिए सूचना दी। वज्रायुध उस उद्यानमें स्थित प्रियदर्शन वापीमें अपनी सात सौ रानियोंके साथ क्रीड़ा करने लगा। इतनेमें ही पूर्व जन्मके वैरी विद्युद्दंष्ट्र विद्याधरने उसे देखकर एक पत्थरकी शिलासे उस वापीको ढंक लिया और नागपाशसे उस राजाको बांध दिया। तब वज्रायुधने रुष्ट होकर उस शिलाको खंडन कर दिया और नागपाशको काट डाला ॥ ६–८ ॥

वज्रायुधके पिता क्षेमंकरने भी लौकान्तिक देवोंके द्वारा सम्बोधे

वज्रायुधश्च पश्चात्प्रापत्सम्पूर्णचक्रवर्तित्वम् ।
युवराजत्वं पित्र्यं प्राप सहस्रायुधश्चापि ॥ १० ॥

वज्रायुधं सभायामासीनं रत्नचित्रनामायाम् ।
भयवेपमानगात्रः कश्चिच्छरणागतः खचरः ॥ ११ ॥

तस्यानुमार्गमेका खेटकतरवारदीप्तभुजयुगला ।
विद्याधरी नरेन्द्रं जगाद मुञ्चेति दर्पकरम् ॥ १२ ॥

अनुमार्गेण च तस्याः प्रापद्विद्याधरो गदाहस्तः ।
मा रक्षैन राजन् तत्कृतमपराधमाख्यदिमम् ॥ १३ ॥

अस्मिन्पूर्वविदेहे कच्छे विजयार्द्ध उत्तरश्रेण्याम् ।
शुक्रप्रभे पुरवरे यशोधरायां सुदत्तस्य ॥ १४ ॥

पवनञ्जवः सुतोऽहं नृपेन्द्र मद्गेहिनी सुकान्तेति ।
दुहिता शान्तिमतिर्मे मुनिसागरपर्वतं गत्वा ॥ १५ ॥

ततः सोदर्यमानामद्याहासीदिमां दुरात्मैषः ।
तत्समये प्रज्ञप्ति सिद्धाऽस्या आगमद् भीतः ॥ १६ ॥

आनीयास्याः पूजां तत्राद्दष्ट्वाऽऽगतोऽहमत्रैव ।
अविनीतं साहसिक मुञ्चेनं दण्डयिष्यामि ॥ १७ ॥

श्रुत्वा ज्ञात्वा स चेदमवधिज्ञानेन पूर्वसम्बन्धम् ।
विद्याधरं बभाषे श्रृण्वनयोः पूर्वजातिमिति ॥ १८ ॥

जम्बूद्वीपैरावतविन्ध्यपुरे विन्ध्यसेनराजस्य ।
पुत्रः सुलक्षणायाः ख्यातो नाम्ना नलिनकेतुः ॥ १९ ॥

जानेसे विरक्त होकर और पुत्रका राज्याभिषेक करके उग्र तप करते हुए अतिपूज्य अरिहन्त पद प्राप्त किया ॥ ९ ॥ इसके बाद वज्रायुधने छह खण्डोंका समस्त राज्य पाकर चक्रवर्ती पद पाया और उसके पुत्र सहस्रायुधने भी पिताकी आज्ञासे युवराज पद प्राप्त किया ॥ १० ॥

एक समय भयसे काँपता हुआ एक विद्याधर रत्नचित्रा नामकी सभामें बैठे हुए वज्रायुधकी शरणमे आया ॥ ११ ॥ उसके पीछे दोनो हाथोंमे चमकती तलवार लिये एक विद्याधरी आई । और राजासे बोली कि इस अभिमानीको छोड़िए । उस विद्याधरीके पीछे हाथमें गदा लिये एक बूढ़ा विद्याधर भी आया और यह कहते हुए कि हे राजन् ! इस दुष्टकी रक्षा मत कीजिए, उसके अपराध कहने लगा ॥ १२-१३ ॥ इसी जम्बूद्वीपके पूर्वविदेह क्षेत्रमे कच्छ नामका देश है । उसमे विजयार्द्ध पर्वतकी उत्तर श्रेणीमे शुक्रप्रभ नामका नगर है । वहाँके राजा सुदत्त और रानी यशोधरा से हे राजन् ! मैं पवनवेग नामका पुत्र हुआ हूँ । मेरी पत्नीका नाम सुकान्ता है । यह शान्तिमति मेरी पुत्री है । यह विद्या सिद्ध करनेके लिए मुनिसागर नामके पर्वत पर गई थी । इस पापीने भाई जैसा माननेवाली उसका परिहास कर विघ्न किया पर उसी समय शान्तिमतिको प्रज्ञप्ति नामकी विद्या सिद्ध हो गई जिससे भयभीत हो वह यहाँ आया है । उसी समय मैं उसकी पूजाकी सामग्री लेकर वहाँ पहुँचा था । किन्तु वहाँ इसेन देख उसको ढूँढ़ता हुआ यहाँ आया हूँ । इस दुष्ट व्यर्थ साहस करनेवालेको छोड़ दो, मैं इसे दण्ड दूंगा ॥ १४-१७ ॥

यह सुन राजा अवधिज्ञानसे उनका पूर्वभव जानकर विद्याधर से कहने लगा कि इनके पूर्वभवको सुनो ॥ १८ ॥

इसी जम्बूद्वीप के ऐरावत क्षेत्रमें विन्ध्यपुरके राजा विन्ध्यसेन

श्रेष्ठी धनादिमित्रः श्रीदत्ता नाम गेहिनी तस्य ।
तत्पुत्रो दत्तोऽभूत्प्रीतिंकरा तस्य भार्याऽऽसीत् ॥ २० ॥

रूपवतीमुद्याने दृष्ट्वा जग्राह नलिनकेतुस्ताम् ।
दत्तोऽपि तद्वियोगात्साधुं सुमतमुपैद् दुःखी ॥ २१ ॥

तत्काले तस्य मुनेरुत्पन्ने केवले सुरागमनम् ।
दृष्ट्वोपशम्य दत्तो मृत्वाऽतस्तीव्रसंवेगः ॥ २२ ॥

जम्बूद्वीपसुकच्छे विजयार्धस्योत्तरश्रेण्याम् ।
काञ्चनतिलके नगरे महेन्द्रविक्रमखगेन्द्रस्य ॥ २३ ॥

जातोऽनिलवेगायां दत्त. पुत्रोऽयमजितसेन इति ।
उपशान्तकषायत्वात्कमला नाम्नाऽस्य खलु कान्ता ॥ २४ ॥

मेघविनाशनिमित्ताद् बुद्ध्वा सीमङ्करस्य पार्श्वेऽसौ ।
प्रव्रज्य नलिनकेतुर्निर्वाणं केवली प्रापत् ॥ २५ ॥

चन्द्रायणोपवासं प्रीतिंकरा सुव्रताऽर्यिकापार्श्वे ।
कृत्वा चान्ते मृत्वा शान्तिमतिस्ते सुता जाता ॥ २६ ॥

एतेन कारणेन स्नेहादहरत्सुतामयं दृष्ट्वा ।
श्रुत्वा राज्ञोक्तं तं सम्बन्धं पूर्वजातिकृतम् ॥ २७ ॥

सर्वे विमुक्तवैरा जग्मुः क्षेमङ्करं जिनं शरणम् ।
शान्तिमतिर्निर्विण्णा कृत्वा मुक्तावलीमार्या ॥ २८ ॥

ईशाने देवत्व प्राप्यैता स्वकशरीरपूजार्थम् ।
तत्काले चोद्भविता जनकाजितसेनयोर्ज्ञानम् ॥ २९ ॥

और रानी सुलक्षणाके नलिनकेतु नामका एक पुत्र था ॥ १९ ॥ उसी नगरमें एक धनमित्र नामका सेठ रहता था। उसकी पत्नी श्रीदत्तासे सुदत्त नामका पुत्र हुआ तथा उसकी पत्नीका नाम प्रीतिंकरा था। रूपवती वह एक दिन किसी वनमें विहार कर रही थी। उसे देख राजपुत्र नलिनकेतुने उसे हरण कर लिया। श्रीदत्ता भी उसके वियोगसे दुखी हो सुव्रत जिनेन्द्रके पास दीक्षा ले साधु हो गया ॥ २०-२१ ॥ उसी समय उन मुनिके केवलज्ञान उत्पन्न होने पर देवतागण उनकी पूजा करने आये, यह देख शान्त-परिणामी श्रीदत्ताको तीव्र वैराग्य हो गया और आयुके अन्तमे मरकर क्रमसे इसी जन्बूद्वीपके सुकच्छ देशके विजयार्द्धकी उत्तर श्रेणीमें काचनतिलक नगरके राजा महेन्द्रविक्रम विद्याधरके यहाँ रानी अनिलवेगासे सुदत्तका जीव अजितसेन नामका यह पुत्र हुआ। यह अत्यन्त मन्दकषायी था। इसकी पत्नीका नाम कमला था ॥ २२-२४ ॥

इधर नलिनकेतुको एक दिन मेघनाश देख आत्मज्ञान प्राप्त हुआ और सीमङ्कर मुनिके पास दीक्षा ले ली। और तपकर अनुक्रमसे केवलज्ञान प्राप्त कर मोक्ष गया ॥ २५ ॥

प्रीतिंकरा भी सुव्रता आर्याके पास चान्द्रायण तप करने लगी और अन्तमें देह त्याग कर क्रमसे तुम्हारे शान्तिमति नामकी पुत्री हुई ॥२६॥ इसी कारणसे इसने तुम्हारी पुत्रीको स्नेह वश हरण करना चाहा था। इस प्रकार राजाके द्वारा कहे गये पूर्वभवके सम्बन्धको सुनकर उन सबने वैर-भाव छोड़ दिया और क्षेमंकर जिनराजकी शरणमें गये। इसके बाद शान्तिमति विरक्त हो आर्यापदकी दीक्षा ले मुक्तावली तप कर ईशान स्वर्गमे देव हो अपने पूर्व शरीरकी पूजा करने आवेगी। उसी समय उसके पिता और अजितसेनको केवलज्ञान उत्पन्न होगा। तब वह बड़ी ऋद्धिके साथ उनके केवलज्ञान-

केवलिपूजां कृत्वा तयोर्महद्धर्या स्वस्थानमथ गन्ता ।
अवतीर्य पुनस्तस्मान्निर्वाणं चापिगन्तेति ॥ ३० ॥

अवधिज्ञानेनेदं कथितं वज्रायुधेन राजभ्यः ।
तुष्टथा विस्मितहृदया राजेन्द्रं पूजयामासुः ॥ ३१ ॥

शिवमन्दिरे खगेन्द्रो विमला भर्त्ता हि मेघमालीति ।
दुहिता काञ्चनमाला साऽनीता कनकशान्तेस्तु ॥ ३२ ॥

वस्त्वोकसारपुर्यां जयसेनाजलधिसेनयोर्दुहिता ।
नाम्ना वसन्तसेना तां च सखित्वेन जग्राह ॥ ३३॥

तस्याश्च मैथुनोऽन्यो हिमचूलः कनकशान्तये रुष्टः ।
अथ कनकशान्तिरायाद्धिमवद्गिरिमन्यदा ताभ्याम् ॥ ३४ ॥

विमलप्रभमुनिपार्श्वे श्रुत्वा धर्मं ततः प्रवव्राज ।
प्राव्राजिष्टां तेऽपि निर्विण्णे विमलमतिपार्श्वे ॥ ३५ ॥

उपसर्गं हिमचूलश्चक्रे प्रतिमां स्थितस्य वैरेण ।
दृष्ट्वाऽमर्यादेति क्षुभिता विद्याधराः सर्वे ॥ ३६॥

प्रतिमां स्थितस्य पुनरपि रत्नपुरे सुरनिपात उद्याने ।
उपसर्गसहस्य मुनेरुत्पन्नं केवलज्ञानम् ॥ ३७ ॥

देवागमनं दृष्ट्वा भीतः शरणागतश्च हिमचूलः ।
अभ्यर्च्य चक्रवर्ती नप्तारं संशयमपृच्छन् ॥ ३८ ॥

की पूजाकर अपने स्थान जावेगी और वहाँसे च्युत हो वह निर्वाण पद प्राप्त करेगी ॥ २७–३० ॥

वज्रायुधने अपने अवधिज्ञान बलसे यह बात राजाओंसे कही। इससे सन्तोष पूर्वक उन सबका चित्त आश्चर्ययुक्त हो गया और उन्होंने नृपेन्द्रकी पूजा की ॥ ३१ ॥

एक समय विजयार्द्धके शिवमन्दिर नगरमे राजा मेघमाली तथा उसकी रानी विमला रहते थे। उनकी पुत्रीका नाम कनकमाला था। उसका विवाह कनकशान्ति नामके राजकुमारसे हुआ था॥३२॥ विजयार्धके दूसरे नगर वस्त्वोकसारमें समुद्रसेन राजा तथा उसकी रानी जयसेना रहते थे। उनके वसन्तसेना नामकी पुत्री थी। वह भी कनकशान्तिसे विवाही गई थी। पर उसका एक भाई हिमचूल कनकशान्तिके ऊपर पूर्वभवके वैरके कारण रुष्ट रहने लगा। एक समय अपनी दोनो रानियोके साथ कनकशान्ति हिमवान् गिरि पर आया और वहाँ विमलप्रभ मुनिके पास धर्मोपदेश सुन दीक्षित हो गया। तथा उसकी दोनों रानियाँ भी विमलमति आर्यिकाके पास दीक्षित हो गईं ॥ ३३–३५ ॥

एक समय कनकशान्ति मुनि प्रतिमायोग धारण कर स्थित थे कि उसी समय दुष्ट हिमचूलने पूर्वबद्ध वैरके कारण उपसर्ग करना प्रारम्भ किया, पर मर्यादाका अतिक्रमण देख सभी विद्याधर राजा, बहुत क्षुब्ध हुए इससे वह वहाँसे भाग गया। किसी दूसरे समय रत्नपुर नगरके सुरनिपात उद्यानमे वे ही मुनिराज प्रतिमा योग धारण कर बैठे थे कि उस दुष्टने पुनः उपसर्ग करना प्रारम्भ किया। किन्तु उन उपसर्गोंको जीतनेके कारण उन्हें केवलज्ञान उत्पन्न हो गया ॥ ३६–३७ ॥

उस समय देवोंका आगमन देखकर वह हिमचूल डर गया और उन मुनिराजकी शरणमें आया। अथानन्तर नातीके केव.

वज्रायुधोऽपि दत्त्वा राज्यं पुत्राय सप्तपुत्रशतैः ।
राजसहस्रैः सह सप्तभिश्च पितरं ययौ शरणम् ॥ ३९ ॥

सिद्धाचले च तस्थौ प्रतिमां संवत्सरं प्रतिज्ञाय ।
वल्लीवल्मीकाभ्यां प्रवेष्टितो नगवदविचारः ॥ ४० ॥

अश्वग्रीवसुतौ यौ रत्नग्रीवायुधौ धरणिभृत्वा ।
हिण्डित्वा संसारे महातिबलनामकौ जातौ ॥ ४१ ॥

चक्रतुरसुरकुमारा उपसर्गं तस्य पूर्ववैरेण ।
रम्भातिलोत्तमागमनदर्शनादेव तौ नष्टौ ॥ ४२ ॥

आराध्याऽस्मिन्नुपरिग्रैवेयाधोविमानके जातः ।
अहमिन्द्रः सौमनसे चैकोनत्रिंशदब्ध्यायुः ॥ ४३ ॥

शतबलिने तु सहस्रायुधोऽपि दत्त्वा सुताय राज्यं स्वम् ।
पिहितास्रवस्य पार्श्वे प्रव्रज्योग्रं तपश्चक्रे ॥ ४४ ॥

ईषत्प्राग्भारगिरौ सम्यग्व्युत्सृत्य मासिकं भक्तम् ।
सोऽप्यगमत्सौमनसं चतुर्विधाराधनायुक्तः ॥ ४५ ॥

इति शान्तिचरिते अर्थाख्यानसंग्रहे आर्यनिबद्धे दामनन्दिनः कृतौ
वज्रायुधकाण्डं नाम चतुर्थः सर्गः समाप्तः ॥ ४ ॥

———

ज्ञानकी पूजा कर वज्रायुध चक्रवर्तीने अपना संशय पूछा ।। ३८ ।। और अपने पुत्र सहस्त्रायुधको राज्य दे, सात सौ पुत्रों व सात हजार राजाओके साथ अपने पिताकी शरणमे गया ।। ३९ ।। अनन्तर वे धीर वीर मुनिराज सिद्धगिरि पर्वत पर एक वर्षके लिए प्रतिमा योग धारण कर स्थित हो गये । उस समय लताओ और वामियो से घिरे हुए वे मुनिराज ऐसे मालूम पड़ते थे जैसे अचल वृक्ष ही हो ।। ४० ।।

इधर अश्वग्रीवके रत्नग्रीव और रत्नायुध नामके दो पुत्र थे जो अपने पापकर्मके उदयसे संसारमे परिभ्रमण कर अतिबल और महाबल नामके असुर हुए । वे दोनो असुर पूर्व वैरके कारण उन पर उपसर्ग करने लगे । उसी समय रम्भा और तिलोत्तमा नामकी दो देवियाँ आईं, किन्तु उन्हे देखकर वे दोनों भाग गये ।। ४१–४२ ।।

फिर वे मुनिराज अच्छी तरह तपकी आराधना कर अन्तमें ऊर्ध्व ग्रैवेयकके सौमनस नामके अधो विमानमे २९ सागरकी आयुवाले अहमिन्द्र हुए ।। ४३ ।।

सहस्त्रायुधने भी अपने पुत्र शतवलीको राज्य दे पिहिताश्रव मुनिके समीप दीक्षा ले ली और उग्र तप किया तथा वे वैभार पर्वत पर एक माहका उपवास कर और चार प्रकारकी आराधना का आराधनकर सौमनस विमानमें अहमिन्द्र हुए ।। ४४–४५ ।।

इस प्रकार दामनन्दिविरचित आर्यावद्ध शान्तिचरितमें वज्रायुध काण्ड नामक चौथा सर्ग समाप्त हुआ ।

पञ्चमः सर्गः

अवतीर्याऽस्मिन्द्वीपे पूर्वविदेहेषु पुण्डरीकिण्याम् ।
घनरथ नृपस्य भार्ये मनोहरामनोरमे चेति ॥ १ ॥

जातौ तयोः सुतौ मेघरथो दृढ़रथश्च तद्भार्याः ।
आद्यस्य प्रियमित्रामनोरमे सुमतिरितरस्य ॥ २ ॥

घनरथमासीनं सुखमन्तःपुरपुत्रपौत्रपरिवारम् ।
गणिका सुषेणिका किल कुक्कुटयुद्धार्थमुपतस्थौ ॥ ३ ॥

दृष्ट्वा मनोरमां शतसहस्त्रपणितां स्म काञ्चनामाह ।
आनय वज्रसुतुण्डं येनेच्छसि तेन नः पणितम् ॥ ४ ॥

लग्नौ शिखिनौ युद्धे न जयत्येकोऽपि किं कुमारेति ।
राज्ञा पृष्टोऽवोचन्मेघरथः पक्षिणोर्जातिम् ॥ ५ ॥

जम्बूद्वीपैरावतरत्नपुरे धन्यभद्रशाकटिकौ ।
अनुडुद्धिनिमित्तमन्योऽन्य हत्वा श्रीनदीतीर्थे ॥ ६ ॥

तस्माद्गजयूथपती तौ ताम्रश्वेतकर्णकौ जातौ ।
दृष्ट्वा सुवर्णनद्यास्तीरेऽन्योऽन्यं पुनर्हत्वा ॥ ७ ॥

जम्बूभारतवास्येऽयोध्यायां नन्दिमित्रपल्लीश ।
यूथे महिषौ जातौ पुष्टौ वरशक्तिसेनाभ्याम् ॥ ८ ॥

युध्वाऽन्योऽन्यं हत्वा जातौ मेषौ पुनस्तयोरेव ।
नृपपुत्रघोटिनौ पुनरेकैकं च जघ्नतुः शिरसा ॥ ९ ॥

पञ्चम सर्ग

वहाँसे च्युत हो वज्रायुध और सहस्रायुधके जीव इसी द्वीपके पूर्व विदेहकी पुण्डरीकिणी नगरीमे राजा घनरथके यहाँ रानी मनोहरा और मनोरमासे मेघरथ और दृढ़रथ नामके पुत्र हुए। इनमे से प्रथम मेघरथकी प्रियमित्रा और मनोरमा ये दो स्त्रियाँ थीं और दूसरे दृढ़रथकी सुमति नामकी भार्या थी ॥ १-२ ॥

एक समय वे घनरथ पुत्र, पौत्र तथा रानियों सहित सुख पूर्वक बैठे थे कि उसी समय सुषेणा नामकी गणिका मुर्गोका युद्ध करानेके लिए आई और मनोरमाको देखकर एक लाखकी शर्त करानेवाली उसकी काञ्चना नामकी दासीसे कहने लगी कि तुम अपने वज्रतुण्ड नामक मुर्गेको लाओ और जैसा तुम चाहो हमारी शर्त रहेगी। इसके बाद दोनों मुर्गे युद्ध करने लगे पर कोई भी मुर्गा नहीं जीता। इस पर घनरथने अपने पुत्र मेघरथसे कहा कि हे कुमार, यह क्या बात है ? इस प्रकार राजाके पूछने पर कुमार मेघरथ पक्षियोंके पूर्वजन्म कहने लगा ॥ ३-५ ॥ इसी जम्बूद्वीपके ऐरावत क्षेत्रके रत्नपुर नगरमे धन्य और भद्र नामके दो गाड़ीवान् रहते थे। एक समय श्रीनदीके किनारे एक बैलके निमित्तसे वे दोनों लड़ने लगे और एक दूसरेको मारकर श्वेतकर्ण और ताम्रकर्ण नामके गजपति हुए। फिर सुवर्णनदीके किनारे एक दूसरेको देखकर आपसमे लड़ मरे और जम्बूद्वीपके भरत क्षेत्रमे, अयोध्या नगरीमे नन्दिमित्र ग्वालाके यूथमें भैंसे हुए। उस नगरके राजपुत्र वरसेन और शक्तिसेनने उन दोनोंको खूब खिलाकर मोटा किया ॥ ६-८ ॥ तत्पश्चात् दोनों आपसमे लड़

इह कुसुमशयनभूतौ विद्याधरसंयुगौ मलम्नात ।
विपरिश्रमेन नम्नाभिरताद्‌निमायकुसागाम् ॥ १० ॥

मरे और उन्हीं दोनों राजपुत्रोंके यहाँ मेढ़े हुए। फिर उन्हीं राज-पुत्रोंसे उकसाये गये वे लड़े और आपसमें शिरसे एक दूसरेको मार डाला ॥ ९ ॥ पुनः इस जन्ममे ये दोनो ये मुर्गे हुए हैं। हे तात। यतः ये दोनों मुर्गे विद्याधरोंसे रक्षित हैं अतः विना परिश्रमके ही वे दोनो लड़ रहे हैं ॥ १० ॥ यह सुनकर राजाने कहा कि ये दोनो विद्याधरोंसे संयुक्त हैं यह क्या बात है तथा कौतुकको उत्पन्न करनेवाले दोनों कौन हैं और यहाँ किस कारणसे आये हैं। यह सब हमे बतलाओ ॥ ११ ॥

इस पर पुत्रने बतलाया कि इसी जम्बूद्वीपके भरतक्षेत्रमे विज-यार्धकी उत्तरश्रेणीके सुवर्णपुरमें गरुड़वेग नामका राजा राज्य करता था ॥ १२ ॥ उसकी रानी घृतिषेणासे चन्द्रतिलक और दिवितिलक-नामके दो पुत्र थे। वे दोनों भाई एक समय मेरु पर्वत पर गये और वहाँ नन्दन वनमे दो चारणऋद्धिधारी मुनियोंकी वन्दना करके अपने पूर्वभव पूछे। इसपर सागरचन्द्र मुनिराजने इस प्रकार कहा कि धातकीखण्ड द्वीपके ऐरावतक्षेत्रके पृथिवीतिलक पुरमें राजा अभयघोष रहता था। उसकी पटरानीका नाम कनकतिलका था। उन दोनोके विजय और जयन्त नामके दो पुत्र हुए ॥ १३-१५ ॥

उसी देशके मन्दारपुरमें राजा शंख राज्य करता था। उसकी रानीका नाम जया था। उन दोनोंके पृथिवीतिलका नामकी पुत्री थी। यह भी अभयघोषकी पत्नी थी ॥ १६ ॥ एक समय बड़ी रानीने अपनी दासी चञ्चत्तिलकाको राजाके पास भेजा। उसने निवेदन किया कि महारानी आपके साथ छह ऋतुकी शोभायुक्त उद्यानमे विहार करना चाहती हैं ॥ १७ ॥ तब उसी समय छोटी रानीने अपनी विद्यासे वहीं पर सब ऋतुओंके बहुमूल्य फल पुष्पोंसे भरा हुआ बाग बनाकर दिखला दिया जिससे राजा उद्यान में नहीं गया। इससे सुवर्णतिलका उद्यानमे विहार करनेमे असमर्थ

उद्यानेऽविहरन्ती पृथिवीतिलकाऽवमाननिर्विण्णा ।
सुमतिगणिन्याः पार्श्वे धर्मं श्रुत्वा प्रवव्राज ॥ १९ ॥

दत्त्वाऽन्यदा नरेन्द्रो दमवरमुनये च दानमतिभक्त्या ।
प्रापत्सुरगणपूजां वसुधारा चास्य निपपात ॥ २० ॥

निष्क्रम्याऽभयघोषः सह पुत्राभ्यामनन्तगुरुपार्श्वे ।
जिनकारणानि षोडश सम्भावयित्वाऽच्युते जज्ञे ॥ २१ ॥

हेमाङ्गदस्य राज्ञो जातश्च्युत्वेह मेघमालिन्याम् ।
सम्प्रति घनरथ इति वां पिता नृपः पुण्डरीकिण्याम् ॥२१॥

यौ विजयजयन्तौ तौ युवामिह हि चन्द्रतिलकदिवितिलकौ ।
इत्युक्ते स्नेहेन तु द्रष्टु युष्मानिहायातौ ॥ २३ ॥

कुक्कुटयुद्धे शक्तान्दृष्ट्वा युष्मान् खगौ खगौ जातौ ।
इति गदितं श्रुत्वा तौ दर्शयतः स्म स्वकं रूपम् ॥ २४ ॥

घनरथमेघरथाभ्यां नमः प्रकृत्य स्वकं पुरं गत्वा ।
गोवर्धनस्य पार्श्वे निष्क्रान्तौ निर्वृतौ चान्ते ॥ २५ ॥

श्रुत्वा विमुक्तवैरौ प्रत्याख्यानं प्रगृह्य मेघरथात् ।
मृत्वा शिखिनौ जातौ भूतरमणकानने भूतौ ॥ २६ ॥

नाम्ना च ताम्रचूल. सुवर्णचूलश्च विविधरूपधरौ ।
ऊढ्वाम्बरे कुमारं तावाटयेतां मनुजलोकम् ॥ २७ ॥

सुरबोधनाद् घनरथो बुध्वा राज्येऽभिषिच्य मेघरथम् ।
इतरं च यौवराज्ये निष्क्रम्य प्रापदार्हन्त्यम् ॥ २८ ॥

रही और पृथिवीतिलकाके द्वारा किये गये अपमानसे विरक्त हो सुमति नामक आर्यिका के पास धर्मोपदेश सुनकर दीक्षित हो गई ॥ १८-१९ ॥

किसी एक दिन राजाने दमवर मुनिको अति भक्तिसे दान दिया। इससे देवोंने उसकी पूजा की तथा पञ्चाश्चर्य हुए। इसके वाद अभयघोष अपने दोनों पुत्रोंके साथ अनन्तसेन मुनिराजके पास दीक्षित हो गया और सोलह कारण भावनाओंका आराधना कर अच्युत स्वर्गमें देव हुआ। वहाँसे च्युत हो वह तुम दोनोका पूर्वजन्मका पिता हेमाङ्गद राजाकी रानी मेघमालिनीसे घनरथ नामका यह पुत्र हुआ है जो पुण्डरीकणी नगरीका राजा है। जो विजय तथा जयन्तके जीव थे वे तुम दोनो यहाँ चन्द्रतिलक और दिवितिलक नामके विद्याधर हुए हो। इस प्रकार मुनिराज द्वारा कही गई कथा सुनकर स्नेहवश वे दोनों विद्याधर आप सवको देखने यहाँ आये हैं। मुर्गोंके युद्ध देखनेमें अनुरक्त आप सवको देख इन विद्याधरोने पक्षीका रूप धारण कर लिया है। इस प्रकार मेघरथसे सब समाचार सुनकर उन दोनोने अपना असली रूप प्रकट किया ॥ २०-२४ ॥ और घनरथ तथा मेघरथको नमस्कार कर अपने नगरमें जाकर गोवर्धन मुनिके पास दीक्षा ले अन्तमें निवार्णको प्राप्त हुए ॥ २५ ॥

उन दोनों मुर्गोंने भी मेघरथसे अपने पूर्वभवोको सुनकर वैर-भाव त्याग दिया और प्रत्याख्यान पूर्वक मरकर भूतरमण वनमें ताम्रचूल और सुवर्णचूल नामके अनेक रूपधारी भूत जातिके देव हुए तथा मेघरथ कुमारको विमानमें विठलाकर मनुष्य लोकका पर्यटन कराया ॥ २६-२७ ॥ कुछ काल वाद लौकान्तिक देवोंसे सम्वोधित हो घनरथने अपने ज्येष्ट पुत्र मेघरथको राज्य पर अभिषिक्त कर तथा दूसरे पुत्रको युवराज पद दे दीक्षित हो अर्हन्त-पद पाया ॥ २८ ॥

देवरमणे निषण्णं शिलातलेऽशोकपादपस्याधः ।
पप्रच्छ प्रियमित्रा दृष्ट्वा सहसा शिलाकम्पम् ॥ २९ ॥

विद्याधरो नु देवः क एष इति चोदितो नृपोऽवोचत् ।
विद्याधरोऽलकायामुभयश्रेणीनामयं राजा ॥ ३० ॥

नाम्ना सिंहरथोऽसौ सविमानो मदनवेगया सहितः ।
अर्हन्तममितवाहनमिष्ट्वागच्छन्प्रतिहत इति ॥ ३१ ॥

मामवलोक्य क्रुद्ध्वा शिलां समुत्क्षिप्तवान्मया सार्धम् ।
अभिभूतो हस्तेन व्यरोदीद्विरसस्वरेणोच्चैः ॥ ३२ ॥

शरणागताऽस्य भार्या सर्वे विद्याधराश्च मामधुना ।
इत्युक्ते प्रियमित्राऽपृच्छत्पूर्वं भवं तस्य ॥ ३३ ॥

पुष्करभारतवास्ये शङ्खपुरे राजगुप्तको नृपतिः ।
भार्याऽस्य शङ्खिकाऽसीच्छङ्खगिरौ सर्वगुप्तमुने ॥ ३४ ॥

द्वात्रिंशत्कल्याणं श्रुत्वा समुपोष्य धृतिवराय ददौ ।
दान च प्राव्राजीत्समाधिगुप्तस्य पार्श्वेऽसौ ॥ ३५ ॥

आचाम्लवर्धमान समुपोष्याराध्य वेणुवने ।
दशसागरोपमायुर्देवोऽभूद् ब्रह्मलोकेऽन्त. ॥ ३६ ॥

इह चानिलवेगायां जातो विद्युद्रथस्य पुत्रोऽयम् ।
या तत्र शङ्खिकाऽऽसीत्सेयं भार्या मदनवेगा ॥ ३७ ॥

इत्युक्ते मेघरथे प्रपूज्य कनकतिलकाय दत्त्वा च ।
स्वपुर खचरैर्बहुभिर्घनरथपार्श्वे प्रवव्राज ॥ ३८ ॥

एक समय मेघरथ देवरमण उद्यानमे अशोक वृक्षके नीचे एक शिला पर बैठे थे। वह शिला अकस्मात् हिलने लगी तब प्रियमित्रा नामकी रानी यह देख पूछने लगी ॥ २९ ॥ कि यह कौन है विद्याधर है या देव है? रानीके इस प्रकार पूछने पर राजाने कहा कि यह दोनों श्रेणियोका राजा विद्याधर है और अलकापुरीमे रहता है और इसका नाम सिंहरथ है। यह अपनी पत्नी मदनवेगाके साथ अमितवाहन तीर्थंकरकी वन्दना कर विमानसे लौटते समय प्रतिरुद्धगति हो गया ॥३०-३१॥ तदनन्तर मुझे देखकर क्रोधित हो मेरे साथ इस शिलाको उठानेका प्रयत्न करने लगा। तब मेरे हाथसे अभिभूत हो वह करुणा भरे ऊँचे स्वरमे रोने लगा। अब इसे छुडानेके लिए इसकी स्त्री और ये सब विद्याधर मेरी शरणमे आये हैं। मेघरथके ऐसा कहने पर प्रियमित्राने पूर्वभवोको पूछा ॥३२-३३॥ राजाने कहा कि पुष्करार्ध द्वीपके भरत-क्षेत्रमे शङ्खपुर नामका नगर है। वहॉ राजगुप्त नामका राजा राज्य करता था। उसकी रानीका नाम शङ्खिका था। एक दिन वे दोनों शङ्खगिरि पर्वत पर सर्वगुप्त मुनिकी वन्दना करनेके लिए गये और वहॉ जिनेन्द्रगुण संपत्ति (द्वात्रिंशत्कल्याण) व्रतको सुना और उसका पालन कर एक समय धृतिषेण नामके मुनिको आहार दान दिया। फिर समाधिगुप्त मुनिके समीप जिन दीक्षा ले ली, तथा आचाम्ल-वर्धन तपका आराधन कर वेणुवनमें समाधिपूर्वक मरण कर ब्रह्म-लोक स्वर्गमे दश सागरकी आयुवाला देव हुआ। फिर वहॉसे च्युत हो रानी अनिलवेगा और राजा विद्युद्रथका यह पुत्र हुआ है। पूर्वभवमे जो इसकी शङ्खिका नामकी पत्नी थी वह यह मदन-वेगा हुई है ॥ ३४-३७ ॥ इस प्रकार मेघरथके कहने पर उस विद्याधरने मेघरथकी पूजा की और घर जाकर अपने पुत्र कनक-तिलकको राज्य दे अनेक विद्याधरोंके साथ घनरथ तीर्थंकरके पास दीक्षित हो गया ॥ ३८ ॥

